# Syamamadhava
## (A long poem in Malayalam)

OF

**Prabhavarma**

Translated into Sanskrit

by

**Dr. N. V. P. Unithiri**

# श्याममाधवम्

प्रभावर्मविरचितं मलयाळखण्डकाव्यम्

डाँ. एन्. वि. पि. उणित्तिरिकृतं

संस्कृतविवर्तनम्

# श्याममाधवम्

प्रभावर्मविरचितं मलयाळखण्डकाव्यम्

## १. कृष्णायनम्

१. नो मे चेतसि कालशेयकबळा-
हारे सुचोरत्वहा-
सार्द्रं ते मुखमस्य मे मनसि हा!
पूर्वं च लक्ष्मीपते।
नो मे चेतसि गोपिकाकुलवधू-
वस्त्राहरेणाहिता-
च्चौर्यापांगविलोलतैक्ष्ण्यरसता-
कौतूहलं चापि ते।।

२. नो मे चेतसि सैन्ययोरुभयतो
मध्ये च दुर्योधना-
दीनां भीतिदजिष्णुसारथिमुखं
कर्मोन्मुखं शोभनम्।
नो ते पौरुषहीनवच्छ्लथधनु-
र्गाण्डीवधारिण्यति-
क्षीणे मध्यमपाण्डवे सति लसद्रूपं
सुधावर्षिणः।।

३. आमोदामृतसाधकं; कळलस-
न्मन्दाक्षमन्दस्मिते-
नाविष्टं सुमनोऽभिराममधुर-
स्नेहार्द्रसंगीतकम्।
चारुश्रीकरमागळं प्रवहतः
काले कळिन्दात्मजा-
तीरं प्रापितवांश्च नैव हरिकां-
बोजीश्रवायाञ्जसा।।



४. गायं गायमतो रसेन बहवः
सन्ध्यां तदा राधया
नीलारण्यनिकुञ्जके रहसि हा!
सम्मेळितो यद्भवान्।
घोषे गोपवधूटिभिः कृतरस-
क्रीडामुहूर्तं समेऽ-
प्येते मे हृदये न किञ्चिदपि चा-
यातास्त्विदं वास्तवम्।।

५. श्रीमद्वेणुरवेण गोपवनिता-
चित्तेषु रागारुण-
श्यामस्निग्धमनोज्ञरूपमिह न
ध्याने चिरान्नागतम्।
मायूरोज्ज्वलपिञ्छजालसहितं
गोपालरूपेऽधिक-
श्यामाभ्राहितकोमळं वपुरिहै-
वालोचितं नो हृदि।।

६. दूरे कुत्रचिदेव तन्मुरळिका-
सारंगरागेण सं-
वीचीव्यापनतस्त्वया मुररिपो!
गूढं समाहूयते।
वायौ लोलपरागराजिवदये!
त्वामेव चायान्त्यथो
मीनाक्ष्यस्त्वरया तदप्यहमहो!
नापश्यमद्यावधि।।
७. अस्त्येवैकमथापि रूपमिह ते
कृष्णस्य यत्सन्ततं
नेत्रे मीलित एव बाष्पकणव-
च्चित्ते स्फुरत्यञ्जसा।
दर्शं दर्शमथातितीव्रकदनै-
रग्निस्फुलिंगैर्वने
ह्येकाक्यास्थितकृष्णरूपमिह यत्
कालाच्चिरात् कल्पितम्।।

★



## २. द्वारकावर्तः

१. सर्वं गतं; त्ववसितं युगधर्मकृत्यं;
नास्तीह शिष्टमवनौ मम कर्मलेशः।
चिन्ताभरेण मनसा च युगप्रभावो
गत्वा वनं गहनमत्र तपश्चकार।।

*

२. पादे निषादपरिविद्धः शरो झटिति
गाढं विशत्यधिकमन्तः
स्खलति किमु पादो? व्यथति किमु नेत्रं?
अस्यां स्थितौ मनसि विभ्रामकं भ्रमण-
मुत्तंसके विनिदधाति?
अत्यन्तदुःखमिह चित्ते प्रविश्य किमु
सर्पोपमं चरति गूढं?
अस्तंगते तमसि विस्तारिते मम तु
मृत्योर्दिनोऽयमिति नूनम्।

प्रसृतो हृदो भवति रुधिरं किमत्र खलु
मरणस्य दार्ढ्यमखिलम्।
स्मरणप्रवाहततिरथ केवलं भवति
नान्यत्किमेवमिह चिन्ता।।

३. जन्मान्तरेष्वविदितं विहितं च सर्वं
किं चात्र सूक्ष्मतरभावयुतं प्रदिष्टम्।
विद्धः शरो रहसि चेन्द्रयुते तदा यत्
कालक्रमात् प्रतिगतः प्रतिकारबुध्या।।

४. पूर्वजन्मनिगूढोग्रमार्गेषु भ्रमविह्वलः।
कृष्णस्य पुरतस्तिष्ठत्ययं निजशरानुगः।।

५. क्षते नेत्रे गते रूक्षक्षताक्तमनसा सह।
खण्डशः खमण्डशश्चैवं निषादो वाचमूचिवान्।।

६. "सत्यमच्युत! मन्नेत्रे तमोमग्ने मनश्च मे।
अज्ञात्वा च कृतं कृष्णमृग इत्येव चिन्तया।।

७. तत्ते पदमितीदानीं ज्ञातं मे मधुसूदन!।
प्रत्यागच्छति नो शापः शरश्चातः क्षमस्व माम्।।"



८. मननध्यानचित्तेन शृणोतीदं स माधवः।
एवंविधं जीवितान्त्यमेतज्ज्ञो हि महाप्रभुः।।

९. म्ळायदात्मप्रकाशेन स्पृशन् किमु स तिष्ठति?।
अतीवधन्यः स्पर्शोऽयमित्यसौ प्रतितिष्ठति।।

१०. निर्निमेषेण नेत्रेण सर्वं पश्यति माधवः -।
निष्पन्दं प्रज्वलद्दीपः प्रचण्डे मारुतेऽप्यसौ।।

११. बन्धवो मित्रभृत्याश्च निश्शेषमखिलेऽपि ते।
विहाय तं प्रयान्त्येव शनैस्ते यत्र कुत्र चित्।।

१२. द्वारकापुरि मर्त्यास्ते सामान्याः सकलेऽप्यमी।
परस्परं निहत्यैवं वंशवृक्षोऽपि नश्यति।।

१३. द्वारकावर्त! हा! सा ते द्वापरप्रौढता कुतः?।
कल्पान्तसागरस्यान्तःस्थल्यां निर्मज्जिता किमु ।।

१४. स्वस्य जीवितभागः स बलरामो हलायुधः ।
निबिडारण्यमध्ये स्वमार्गभ्रंशेन शोचते!।।

१५. अन्ततो धरणिं पश्चात् विहायासौ प्रयात्यहो!।
छायैवेयं तु शिष्टेति कृष्णश्चिन्तापरोऽभवत् ।।

१६. रत्नभूषां विमुच्यासौ भस्मलेपान्विता स्थिता।
सपत्न्योरुभयोर्मध्ये रुक्मिणी स्वप्रियङ्करी ।।
१७. तस्याः सतीत्वलब्ध्यर्थं मनः किं कुरुते चिताम्?।
सहधर्मस्तुल्य एव जीविते मरणेऽपि च।।
१८. सर्वं सन्त्यज्य याता च सन्न्यासं कर्तुमञ्जसा।
सर्वमंगलयुक्ता सा स्वर्णगेहांगनावली।।
१९. अन्ततो द्वारके! त्वां स प्रळयाब्धिर्जहार किम्?।
जगद्भक्षयिता कालसर्पस्त्वां श्रीहरिं विभुम् ।।
२०. सर्वस्मिन् पश्यति हरे! तव नेत्रे प्ळुते किमु?।
अथवान्तश्चित्ततापादश्रूण्यस्तंगतानि किम्?।।
२१. तदाप्यानन्दरूपोऽस्ति भवानित्येव शस्यते।
दृश्यस्य भावो द्रष्टारो निश्चिन्वन्तीति का कथा?।।
२२. एतज्जीवितमानन्दमयमित्यपि को वदेत्?।
कस्य वा जीवितुं साध्यमानन्दमयजीवितं?।।
२३. आनन्दमिच्छेद् यदि तदन्विच्छति सदैव तम्।
आनन्दो दृश्यते सर्वत्रेति भावस्तदा भवेत् ।।



२४. अथवा दृश्यते बाष्पः स तर्ह्यानन्दजो भवेत्।
यदि दृश्येत दुःखं तत् पुळकोद्गमसंभवम्।।
२५. प्रकाशस्यास्तगमने रज्जौ सर्पभ्रमो भवेत्।
दिने चोग्रं ज्वलत्येव मनः सर्पे भवेद् यदि?।।
२६. भास्वद्वर्णतरंगसप्तकसभा-
सम्मेळने नेत्रयो-
र्दृश्यं श्वेतमयं, त्वदृश्यमखिलं
दृश्यं विभाति स्वयम्।
उद्यन्नादतरंगसप्तकमिहै-
वास्तंगतं; मृत्युव-
न्मौनं सर्वगतं; श्रुतं त्विह भव-
त्यश्रुतं हन्त! चित्रम्।।

★

## ३. विषादपर्व

१. प्रत्यागतिर्न वचसः प्रहितेषुवत् प्र-
विद्धो भवत्युभयमप्यथ हृत्तटान्ते।
अस्मिन् न दुःखकणिकेति तु वस्तुतत्त्व-
मत्रापि संस्मृतिषु नास्तमितः प्रकम्पः।।

२. सर्वेऽपि मानुषचयाः कथयन्ति हर्ष-
मूर्तिर्हरिः परमतो हि भजन्त्यमी ते।
मामेव दुःखहरणाय, परन्तु नैव
जानन्ति ते हृदि ममाहितदुःखभारम्।।

३. मार्गे क्वचिद् व्यतिचलत्वमभूत् कदाचित्,
सत्यग्रहे निशितता न हि पालिता च।
सत्यात्स्वयं व्यतिचलन्नथ बोधपूर्वं
छायानिषेवणपरोऽप्यभवं वृथैव।।

४. एवंकृतौ बहुविधं च भवेन्निमित्त-
मत्रापि शान्तिरहितं मनसश्च मौढ्यम्।



प्रत्यागते भवति चेदिह भूतकाले
नैवं भवेत् पुनरपीति विचारयामि।।

५. सत्यं तरोश्च शिखरेषु कुतश्चिदेत्य
दूराद् बहोर्मिळति नैकविहंगवृन्दम्।
अत्यल्पकालमथ तद्विजहाति, तद्वद्
गच्छत्यलं मनुजजीवितमप्यजस्रम्।।

६. जीर्णानि हन्त! वसनानि विहाय नव्य-
रूपाणि तानि विदधाति यथा मनुष्यः।
जीर्णं शरीरमिह संपरिमुच्य देह-
मन्यन्नवं; तदिह दर्शनसत्यमेकम्।।

७. जीवः क इत्यय,ममुं निहनिष्यते क
इत्यादिचिन्तनमनर्थकमित्युपेक्ष्यम्।
देहावसानमिह नेत्यपि चिन्तनीयं,
जीवस्य नान्त्यमिति तस्य सुपिण्डितोऽर्थः।।

८. एतस्य चास्त्यपरसत्यवशं हृदन्ते
नैवागतं विततरूपतया तदानीम्।

गात्रं च नैव; न च तस्य गुरुत्वसार;-
मेतस्य निर्हननमेव निरर्थकं स्यात्।।
९. वेगोग्रमारुतगतिं प्रतिकर्तुमीष्टे
का वा तुषारकणिका कुसुमोपरिस्था?।
वातागतिज्ञमनुजः कुरुते वृथा किं
प्रागेव तत्पतनकारकरूपयत्नम्?।।
१०. निस्सारसाधननिराकरणे किमर्थं
को वा समुद्यमपरिश्रममाचरेत?।
व्यर्थेषु कर्मसु बहुष्वधिपत्वभावे-
नामग्नतामकरवं हि निरर्थमेव ।।
११. ज्ञातं न कैश्चिदपि किञ्चन भाविसत्य-
मुक्तं मयैकमिह; तत्फलमेव नूनम् :
मर्त्या मृता बहुविधा; बहवोऽपरे च
जीवन्मृता नरकयातनतां ग्रसन्ति।।
१२. व्यक्तं भवत्यखिलमद्य; यदा तु जीव-
सूर्यस्य चास्तगमनादिह पूर्वमेव ।



नात्रास्ति तस्य परिशोधनकर्मणे च
मात्रापि; तत्कदनभारमसह्यचिन्तम्।।

★

## ४. कर्णातपः

१. ध्यानस्थं हृदयं; तथापि गहने
संग्रामरंगेऽमर-
श्रीलास्यत्पदमत्र दृश्यमतुलं
रक्ताभिषिक्तं मुखम्।
मा भूद् दृश्यमिदं त्विति प्रवितते
गाढान्धकारं पुनः
खिन्नान्तःकरणे हरौ हृदि ततो
राधासुतो दृश्यते।।
२. किञ्चिच्चोद्यं न चोक्तं, तदनु च गदितं
चास्य तर्ह्युत्तरं तत्
कश्चिन्न स्वीयपक्षं द्रढयितुमथ नो
यत्नमासीत् कृतं च ।
धीरे कृष्णस्य चक्षुष्यनवरतमथ
स्यन्दते बाष्पबिन्दुः



सन्तप्ता चानुतापाज्ज्वलदनलकटाहाद्
यथा कर्णलक्ष्यम्।।
३. पुरतस्ते दर्पणवदद्य तिष्ठत्ययं जनः।
पश्य त्वमाभिमुख्येन यावज्जानासि सर्वथा।।
४. जाने स्म सूर्यपुत्रस्त्वमिति सत्यं पुरैव यत्।
नोक्तं मया तदापि त्वं निन्दापात्रमभूद् यदा।।
५. अर्जुनो द्वन्द्वयुद्धे त्वत्प्रतियोग्यभवद् यदा।
कुलप्रश्नशराविद्धस्तदा खिन्नोऽभवो भृशम्।।
६. कोऽहमित्यस्योत्तरार्थी स्वकीयं पूर्वजीवितम्।
प्रत्यध्यायं प्रतिपुटं सविस्तरमधीतवान्।।
७. अभ्यासवेदिकायां सन्नतशीर्षे त्वयि स्थिते।
सर्वेऽपि त्वां परित्यज्य स्थिता निष्पक्षभावतः।।
८. शिशिरे शीतळे तापदायकं पावकं यथा।
हस्ततापभिया शीघ्रं त्यक्तुकामा नरा इव।।
९. सहसैव तु कौन्तेय! त्वां निरस्योचिवानहम्।
गुरुः कृपोऽथ विदुरो धृतराष्ट्रश्च सत्वरम्।।

१०. दयाच्छायालब्धये ते पतितं नयनद्वयम्।
येषु तेषां परित्यागात् सूर्यं वीक्ष्य स्थितोऽभ-
वः।।

११. पश्चान्नीलाब्दपत्रस्य तत्क्षणं सूर्यमण्डलम्।
अन्तर्हितं वा, तनयदुःखान्म्ळानमभूत् किमु?।।

१२. पुत्रोन्मुखप्राप्त्यशक्ता स्पर्शकामांगुली तदा।
कुतश्चिदग्निरूपेण ज्वलति स्म शनैः किमु?।।

१३. ऊष्मळं पुत्रवात्सल्यमज्ञात्वा यत्र कुत्र चित्।
तदन्विष्याचरः, शैत्यशितत्वं प्रत्युतान्वभूः।।

१४. धरातलापरार्धे सुप्रकाशे मज्जति स्म यत्।
अस्यां दिशि तमिस्रार्धे किं त्वदन्वेषणं त्वभूत्?।।

१५. अधरार्द्रीकारयोग्यं स्तन्यं यदुरसि स्थितम्।
त्वदर्थं दोहनायोल्कं निष्फलं विद्यतेतराम्।।

१६. आर्द्रं तत्स्निग्धमाधुर्यं नास्वादं कर्तुमक्षमः।
तदन्वेषात् तिक्तरसमेव त्वमनुभूतवान् ।।

१७. त्वदर्थं तदुरः पूर्णीभवदासीद् यदा तदा।



तृष्णाशुष्कगळो जीवमरुवातेऽचरद् भवान् ।।

१८. अज्ञात्वा पितरं खिन्नमनसो बहवस्त्विह।
तेषामपि ध्रुवं माता केतीत्यत्र न संशयः।।

१९. कर्ण! त्वमेक एवासि यो न जानाति चोभयम्।
कोऽहमित्यस्य तीक्ष्णस्य सन्देहस्यास्य सन्ततिः।।

२०. कः पिता? नयनैर्द्रष्टुमशक्यः स दिवाकरः?।
स ते नेत्रस्य पुरतस्तिष्ठन् सूतवयोधिकः?।।

२१. माता का? सत्यतो राधा यापुष्टस्त्वच्छरीरकम्?।
छायेव गुप्ता तमसि कुन्ती सा करुणानिधिः?।।

२२. किं तेऽभिधानं? कौन्तेयो राधेयो वेति कथ्यते।
बहुभ्यो बहुधा स्यात्; त्वं कर्ण! कस्तव चोच्यताम्।।

२३. के वयं त्विति चोद्यस्य बहूनां बहुधोत्तरम्।
अस्माकं के वयमिति ह्यज्ञातत्वं तु दीनता।।

२४. अंगराजस्त्वमेवेति तत्क्षणं स सुयोधनः ।
अभिषेकं चकारा,यं स्नेहस्ते शाश्वतोऽभवत्।।

२५. अपमानात् त्राणमेव विद्यते तन्महत्तरम्।

मृत्युवक्त्राद् रक्षणं च तत्समानं न वर्तते ।।
२६. जज्वाल सूर्यपुत्रस्त्वमिति सत्यं; तथाप्यहो!
ज्योतिरेतन्न कस्यापि पुरो न विवृतं मया।।
२७. सदा व्याप्तुं च सर्वत्र शक्ता सत्यस्थितिस्तव।
न कुत्राप्युदयं कर्तुमवधानं कृतं मया।।
२८. न केवलं वचोभिस्तद्वञ्चकत्वं, तु खड्गतः।
तीक्ष्णेनापि च मौनेन शक्यते स सुनिर्णयः।।
२९. केवलं तत एव त्वमपमानितवानभूः।
केवलं तत एवैवं क्रूरोऽभूत् तादृशो विधिः।।
३०. तदैव यद्यहं सत्यमवदिष्यदसंशयम्।
शिथिलः स्यात् शक्तिबन्धो; युद्धमेघोऽपि
मुच्यते।।
३१. नोदिता भास्करस्येव किरणं सत्यदीप्रता।
यद्युदेष्यति रात्रिर्न भविष्यति तदा ध्रुवम्।।
३२. तत् तु नैव मनस्यासी,दपराधो महान् मम।
फलं च विविदे कालो जीवितं लोकवासिनः।।



३३. अन्ततो युद्धरंगे त्वद्रथचक्रे निपातिते।
न्यस्य चापं रथोद्धारश्रमे चोद्यं त्वयोदितम्।।
३४. धर्मः किं न्यस्तचापेऽस्मिन् वधोद्योगपरिश्रमः?।
एवं प्रश्नेन ते युद्धधर्मवीर्ये ज्वलत्यथ।।
३५. सत्यमेव तदित्येवं वदन्नेव स्थितोऽर्जुनः।
स्मरामि - ते रथोद्धारे समयोऽदाद् यथाविधि।।
३६. तत्क्षणं वर्धमानं ते युद्धवीर्यशमोद्यमे।
समाह्वयं 'हे सूतस्य पुत्रे'ति त्वां निरङ्कुशम्।।
३७. क्वाथने शीतळीकारे समर्थं तन्मनः किमु।
महान् भारः सदैवेति चिन्ताविष्टो बभूव सः।।
३८. जानामि - सत्यमखिलं हित्वासत्यविषांबुधौ।
निदधौ; स्वार्थलोभेनाधर्ममेवावृणं त्वहम्।।
३९. ततः परं तदा त्वामभ्यस्त्रं वेद्धुमनुज्ञया।
तदा मामनुसृत्यैवं चकार स धनञ्जयः।।
४०. हित्वा विवेकं धर्मं च वृतोऽधर्मो मया तदा।
अतः समभवत् सर्वं यन्निषिद्धं तदेव च।।

४१. साक्षात्फलमिदं तस्य विधिरेवेति चिन्तये।
यदा दुरन्तं सकलं मनस्यायाति सर्वदा।।
४२. कर्ण! त्वमेव चिन्तायां धर्ममात्रपरायणः।
धीरः सत्यपथं हित्वा यो न सञ्चरति ध्रुवम्।।
४३. ववर्ष चेन्नास्ति शिष्ट इति ज्ञातेऽपि भूयसा।
वर्षेण भूमिमाश्वास्य तिष्ठन्मेघनिभः कृती।।
४४. आत्मनाशकरं दानं स्वेच्छया कृतवान् स्वयम्।
कवचं कुण्डलं सर्वं त्यक्त्वेषुं स्वीचकार यः।।
४५. प्रतिग्रहो हि मरणमिति ज्ञात्वापि निर्भयम्।
स्वयं प्रज्वाल्य तज्ज्योतिः सर्वत्र प्रससार यः।।
४६. पार्थं विना पाण्डवेषु न कञ्चित् प्राणनाशकम्।
शरं वेद्धुं विचारोऽस्य मानसे स्थितिमाहितः।।
४७. कुन्तीमेवं सत्यमुक्त्वा कौन्तेयोऽभूत् स्वयं भवान्।
नैव भीमादिकान् भ्रातॄन् हन्तुमुद्युक्तवान् तदा।।
४८. आचार्यस्य सुषुप्तेस्तु भंगो मा भूदिति स्वयम्।
भृंगदंशनसन्तापं सोढवानेकदा भवान्।।



४९. सहनस्य फलं तिक्तशापरूपेण चाभवत्।
तदप्याचार्यकृपया स्वीचक्रे नतशीर्षकः।।
५०. मृत्युसन्तप्तसमयेऽप्यत्यन्तं दीप्तिमन्मुखम्।
तदापि सुमहादानकर्मणा पूर्णतामगात्।।
५१. उग्रवातान् प्रतिस्थातुमशक्ताः पञ्चपाण्डवाः।
कल्पन्ते किमृजुत्वात् तत्प्रतिरोधाय केवलम्?।।
५२. जानाम्यतो हि भगवानच्युतोऽभूत् च्युतः परम्।
पातयद् वञ्चनेनैव कृष्णो जिष्णुर्न दुर्बलः।।
५३. अतस्त्वां द्रष्टुमेवाहमशक्तो विह्वलोऽस्मि हा!।
कृष्णस्य नष्टं यत्सर्वं माहात्यं त्वयि सञ्चितम्।।
५४. आभ्यां न शक्तो नेत्राभ्यां त्वामहं सूर्यपुत्रक!।
अतो हि स्याद् दर्शनं मे मन्दीभवति सन्ततम्।।
५५. जीवितेन हि कुर्वन्ति कार्याणि विविधान्यपि।
कर्माण्येव हि मार्गाणां विधातारः सुचिन्त्यताम्।।
५६. बहूक्त्वा दुःखवन्तं तं कृष्णं स्पृष्ट्वा स तिष्ठति।
कोटिसूर्यप्रभः कर्णो धनुर्वेदविशारदः।।

५७. धूपपात्राद् यथा कृष्णागुरुधूमास्तथोद्‌गताः।
उत्तप्तहृदयाद् दग्धचिन्ताः सर्वत्र विह्वलाः।।
५८. कर्णान्तःप्रज्वलद्वाचः श्रूयन्ते कृष्णकर्णयोः।
मन्त्रतुल्यं स्वीक्रियते तत् कृष्णेन यथाश्रुतम्।।
५९. जानामि - चतुरंगे तदक्षाः केवलतो वयम्।
न शक्ताः किन्तु निर्णेतुं समयं चलनान्यपि।।
६०. जयः पराजयश्चापि सङ्कल्पौ तौ विभिन्नकौ।
विजयो विग्रहे सोऽपि कालस्येच्छैव केवलम्।।
६१. विजयो मरणे चापि स्वास्थ्यहीनः सुसौभगः।
पराजयस्त्वात्मनि प्रशान्तिदः सुखदो लयः।।
६२. बालवद् विद्यते कालः किमु वा क्रीडनीयकम्।
तस्येमे मानुषाश्चैव जीवितानि च सर्वदा?।।
६३. शयानस्य तु कालस्य हृदये विलसत् किमु।
स्वप्नं भूमिः कर्मबन्धशृङ्खलाः सकलाश्च वा?।।
६४. विचार्य गतकार्याणि पुनः खेदेन किं फलम्?।
अपराधविचारेण तेषां वा लभ्यते फलम्।।



६५. तनुर्भूत्वा धूमजालो मेघीभवति किं क्रमात्?।
तस्यारोढुं कृष्णचित्तमथ व्योमायते किमु?।।
६६. निमीलिताक्षः किं कर्णमेतं पश्यति यादवः?।
न नेत्रोन्मीलनं द्रष्टुं तमन्तरुदितं भृशम्।।
६७. पुरोभवं लोकमेव दृश्यते चक्षुषा त्विमम्।
नेत्रे निमीलिते साध्यं भुवनत्रयदर्शनम्।।
६८. लोकत्रयस्य कालत्रितयस्यापि च दर्शनात्।
तृप्तोऽयं पूर्णकामोऽभूदन्तरा त्वन्धतावृतः।।
६९. स्मृतेः सुतनुवस्त्राणि त्यक्त्वा नग्नेन चेतसा।
पुरो गच्छति तं पारं प्रपश्यन् ज्योतिषः परम्।।
७०. निर्वाणाग्नेर्नाळतुल्यं कर्णः संगच्छते पुनः।
पुत्रसन्तप्तचेतस्के ज्वलत्तपनमण्डले।।

★

## ५. धर्मसंगरः

१. अभ्रे वारिदभीकराक्षियुगळै-
वर्षत्तमोमण्डलं
भूमौ स्यन्दनसंगरोग्रपटह-
ध्वानस्य कोलाहलः।
एकान्ते कतिचित् क्षणानि मरणौ-
न्मुख्ये स्थिते कृष्ण! ते
तिष्ठत्यग्रत एव सिन्धुनृपती
रक्तैश्चलन्मानसः।।

२. नो जाने कुत एव कुत्र भवती-
त्येतत्तथा नो परं
जाने तत्सदसत्त्वमप्यनुमिति-
र्नैवागता चिन्तने।
आयात्येष जयद्रथः पुर इति
व्यक्तं न वक्तुं ह्यतो



रूपं धूमिलमेव भाति नयनं
शक्तं न कर्मण्यपि।।

३. जयद्रथो को भवति स्म? युद्धे
वीर्योज्ज्वलः सूर्य इव प्रतापी।
कृतज्ञताघोषविरुद्धयात्रा-
रथात् कुरुक्षेत्रविमाथनोल्कः।।

४. गान्धारपाञ्चालदशार्णचेदि-
राष्ट्रध्वजानां परिपालकोऽसौ।
जयद्रथोऽग्रे ननु वर्तमान-
श्चिरात् परिक्षीणमनाश्च खिन्नः।।

५. नेतः परं द्रष्टयितव्य एवं
यो यो मया प्रार्थितपूर्व आसीत्।
पश्यामि भूयः किमु तं तमेव;
सत्यं प्रतीतिर्ननु संभ्रमो वा।।

६. निश्शब्दमूर्तिः स च वर्तते; किं
शब्दायमानं तु तदेव मौनम्।

कृष्णो निमीलन्नयनोऽपि तस्य
चित्ते ज्वलच्चित्रसहस्रमस्ति।।
७. इत्यादिचिन्तानिचयैर्मुकुन्दो
विश्रामलाभाय गतोऽन्तरेव।
अत्यन्तमन्तर्गमनेऽपि सत्य-
तप्ताग्निरन्तर्दहतीव नूनम्।।
८. वक्तुं न किञ्चित्; परिशून्यतायां
लीनो भवेयं यदि शान्तिलाभः।
द्रष्टुं न किञ्चित्; तमसो निचोळ-
लब्धौ परं विश्रमलब्धिरेव।।
९. कालेन दत्ता दयया निमेषा
युगाः स्युरत्यन्तदुरन्तयुक्ताः।
दुस्साध्यमेवास्य लघुत्वकर्म,
साध्यं लघूकर्तुमिदं तदायुः।।
१०. तस्यापि साफल्यमतीव भद्र-
मित्यत्र वक्तुं न हि कोऽपि शक्तः।



सद्यो भवेन्मृत्युरिषुप्रविद्धे
कालक्रमेणापि तथेति सत्यम्।।
११. आमृत्युकालं त्ववलंब्य बाण-
शय्यां महान् भीष्मपितामहोऽपि।
सन्तप्तचित्तो रुधिराक्तदेहो
व्यथासहस्राण्यनुभूय शिश्ये।।
१२. मृत्यूचितं तत्त्वयनं प्रतीक्ष्य
भीष्मस्य शय्याश्रयणं वदन्ति।
शक्नोति को मृत्युमुहूर्तमल्पं
दैर्घ्यं विधातुं, लघु चापि कर्तुम्।।
१३. इच्छामि तज्ज्ञातुमतीव दुर्ज्ञे-
यालक्तिकं भावलयं प्रगन्तुम्।
जानामि तस्यास्ति ममावकाशो
येनाधिपत्यं मृतिजीवयोस्तत्।।
१४. द्रुतं प्ळवन्नप्यनुगम्यते चेत्
गतो भवेन्नो ग्रहणाद् विमुच्य।

प्रसूनलिट् सोऽप्यनुगाम्यभावे
क्रमेण नः प्रागनुगन्तुमिच्छेत्।।
१५. इत्थं विचिन्ताभरितो मुकुन्दो
जयद्रथं वाचमवोचदेवम् -।
"मया कृतं त्वां प्रति निर्दयत्वं;
तथापि चायातमिह त्वया किम्?।।
१६. अस्तंगमात् पूर्वमथाहवे त्वां
हन्तुं न शक्तो विवशोऽर्जुनोऽभूत्।
धर्मं विहायाथ विचिन्त्य गूढं
तन्त्रं प्रयोक्तुं त्वरितोऽस्मि गाढम्।।
१७. संग्रामरंगेऽर्जुनसारथिः सन्
त्वां प्रत्यकुर्वन् परमापराधम्।
नीतेर्विरुद्धं तदतः फलं ते
जीवस्य नाशः परमं कठोरम्।।
१८. यदा प्रतिज्ञापरिपालनाय
शक्तो न जिष्णुर्विवशो बभूव।



तदा मया चक्रकरेण सूर्यः
पर्यावृतश्चास्तमयप्रतीत्यै।।
१९. आश्वस्य सन्ध्यागमनेन वेगात्
समुत्थिते त्वय्यथ चालितं तत्।
चक्रं मया, तत् प्रभया सहास्त्रे
निपातिते चक्षुषि हा! हतस्त्वम्।।
२०. एवं मृतिस्ते न तदा भविष्येत्
तदग्निकुण्डे विजयात्महत्या।
स्यादेव नूनं समयानुसार;-
मेवं कथा सर्वमभूद् यथार्थम्।।
२१. एतादृशं सत्यमभूत्, तथापि
संरक्षितं त्वर्जुनमग्निकुण्डात्।
प्रत्यानयन् जीवितशाद्वले वाङ्-
मृत्युञ्जयेशोभवमेवमेव।।
२२. आसीत् पुरा जिष्णुकृतप्रतिज्ञा
यद् विप्रबालस्य मृतेः सुरक्षा।

समं प्रतिज्ञां कृतवान् : न चेत् स
भवेद् यदग्नौ पतितो मृतः स्यात्।।
२३. तदग्निकुण्डाद् विजयं समर्थं
संरक्षितुं जीवयितुं च शक्तः।
बभूव कृष्णो हि वचोविशेषा-
दिति प्रशस्तं भुवने चिराय।।
२४. संग्रामरंगे विमुखे स्थितेऽस्मिन्
जिष्णौ वचस्तीर्थजलेन तं तु।
पूर्वस्थितिं कारयति स्म युद्ध-
वीर्यं समुत्तेजितवांश्च कृष्णः।।
२५. तथाविधैर्वाग्विभवैश्च पार्थं
संरक्षितुं साधितमेव चात्र।
जयद्रथ! त्वां विनिहन्तुमेवं
धर्मं विहायापि विनिश्चितं हा!।।
२६. मयापराद्धं त्वयि बोधपूर्व-
मेव स्वयं, क्षन्तुमथार्हसि त्वम्।



तत् किन्तु ते वक्तुमहं न शक्नो-
म्य,द्य स्थिरास्वस्थमना भवामि।।
२७. निवर्तमानं, शरणार्थ्यपेक्षा-
समर्पकं, युद्धभयङ्करत्वे।
अश्रद्दधानं च वधं निषिद्ध-
मित्थं पुराधर्मविदो वदन्ति।।
२८. किरीटिनो जीवितरक्षणार्थं
जीवश्च ते वञ्चनया जहार।
न ह्यग्निदग्धें,बुनि नो विलेयो,
न वायुना शोषयितुं समर्थः,।।
२९. न शस्त्रवेध्यो भवतीह जीव;-
स्तस्यापि किं वास्ति विभेदचिन्ता?।
वाचो हि संशोधनकर्मणेऽभू-
दतीवनिष्कर्षककर्मबन्धः।।
३०. त्वयाभिमन्युर्निहतः पदेन
शीर्षे, ततस्तद्धनने न धर्मः

चिन्त्यः स एवास्ति यथार्थधर्मः
- इत्थं मया चाथ निरुच्यते स्म।।
३१. भीमः स किन्त्वेकदिने स्वपादं
सुयोधनस्योपरि यद् जघान।
तदस्य धर्मस्य विलंघनं ना-
पश्यं त्वहं किञ्चन; पक्षपातात्।।
३२. मया पुरारूढरथेन चैव
युद्धः कृतः, किन्त्ववनौ स्थितः सन्।
ददावनुज्ञां शरवेधनेऽहं
धनञ्जयस्यानुचरान्, किमेतत्?।।
३३. तदा जरासन्धवधाय भीमोऽ-
शक्तोऽभवत्, तत्र तु धर्मचिन्ताम्।
त्यक्त्वा मया पर्णविभेदनेन
दत्तः परं तद्धननाय संज्ञाम्।।
३४. पार्थैकलक्ष्यस्य भगेन विद्ध-
नारायणास्त्रस्य निवारणाय।



शरस्य मार्गे व्यतिचालितोऽहं;
धर्मः कुतः सारथिबाणकृत्ये?।।
३५. दुर्योधनं हन्तुमसाध्यमेवं
मत्वा च भीमे परिखिन्नचित्ते।
मर्मप्रदर्शार्थमथोरुमध्ये
ताळं मयाकुर्वमिहाथ धर्मः?।।
३६. निष्पक्षताबन्धितसारथिः स-
न्नहं च कर्मव्यतिचालनेन।
सुदर्शनेनाहवकर्ममार्गे
चरन्नधर्मे पतितोऽभवं किम्?।।
३७. स्थितः पुरो मौनयुतो भवान् मे
तथापि ते मौनमनेकवाग्भिः
बहूनि चोद्यानि शराणि वर्ष-
त्यहं शरव्यं; तदपीह जाने।।
३८. नैवोत्तरं मेऽस्त्यत एव चोद्य-
शतं स्वयं चैव समुन्नयामि।

यद्युत्तरं, नैव भवेयुरेवं
चोद्यान्यनेकानि निरुत्तराणि।।

★



## ६. मातृवाक्यम्

१. चिन्तायां हिमवत् किमस्ति जनितं?
त्वव्याकृतेनावृतं
तद्भूतप्रकृतिस्तमोनिबिडमे-
वास्ते भयोत्कम्पितम्।
घोरं चान्धतमो; भयङ्करतरे
युद्धावसाने च र-
क्ताक्ते क्षेत्रतटेऽन्धतामतिनयन्
हन्त! गान्धारपुत्री।।

२. वर्षं त्रिंशद्गतं षड्युत,मथ गा-
न्धारि! सत्यं त्वयोक्तं,
व्यक्तं यद् विशदं च सर्वमिह तद्
द्रष्टुमेवागतासि।
नैतद् भस्मान्तमित्थं विशदयितुमलं
वन्दनीया त्वमेवं

घोरं कान्तारवह्निप्रळयमतिनयन्
तिष्ठसि त्वं पुरो मे।।

३. ईषद्भासि च दीपचक्षुषि चिरा-
दागतेऽस्मिन् मुहूर्ते
ह्युत्तप्तोन्मनसा निजान्तिकसमा-
यातां जनित्रीसमाम्।
कृष्णो वन्दनमाचरन् सविनयं
प्रोवाच - "धन्ये नमः
स्वीकर्तुं मां त्वमर्हस्ययि च महा-
पापिनं पुत्रभावात्।।

*

४. पुरा त्वयोक्तं कदनातिरेका-
दभूदिदानीं सकलं च सत्यम्।
अतो ह्यहं न प्रतिवाचमूचे,
न न्यायवादाय कृतश्च यत्नः।।



५. शापं वचस्तेऽखिलमेव शीर्ष्णा
वहन् तदा त्वत्पुरतः स्थितोऽहम्।
मया ह्यसाध्यं न किम,प्यतो हि
युद्धं विहातुं न यते स्म किञ्चित्।।
६. उन्मूलनाशस्य च मूलमासं -
अत्यन्तखिन्नोऽस्म्यहमत्र भूते।
मातस्त्वया ग्राह्यमिदं समस्तं;
गान्धारकन्ये! तदिदं क्षमस्व।।
७. पुरः समेषां सकलानधर्मान्
न्यायोक्तियुक्तं ह्यवदं सदाहम्।
सर्वं सुसाध्यं तदहं विजाने
कृते समस्ते ह्यनुतापमग्नः।।
८. वचांसि नानार्थयुतानि तेषु
कांश्चिच्च केचिद् वृणते परे तु
स्वार्थाय चान्यानपरान् न चैव;
तत्त्वोक्तिमाला कथितैतदुक्तिः।।

९. एतत्त्वनर्थं भविता परन्तु
सन्दिग्धतायां भवयानकाले।
किं वच्म्यहं हा! जननीं पुरस्थां
मृतस्वपुत्रावलिदग्धचित्ताम्।।

१०. तस्मादहं यादववंशनाश-
शापं च मातुः शिरसा गृहीत्वा।
तिष्ठामि कालाब्धिगते भवाब्धौ
सन्धावमुष्मिन् मम चान्त्यकाले।।

११. दौत्याय याते विजयं न गच्छेत्
तदित्यहो! मे मनसीह चासीत्।
किञ्चित् परप्रेरणमस्य चेतो-
वस्त्राञ्चलस्याभवदत्र पश्चात्।।

१२. उद्यत्प्रतीकारतुषाग्निमग्न-
चित्ता तु पाञ्चालसुताऽऽभवत् सा।
यस्याः क्रुधान्धं वच एव युक्ते-
र्विवेकतो मे जयति स्म चान्ते।।



१३. अज्ञातमासीत् प्रियपाण्डवानां
मन्मानसान्तर्लिखितस्तदानीम्।
निगूढबन्धोऽभवदत्र नूनं
पाञ्चालपुत्रीगत एव मूलम्।।

१४. न केवलं युद्धनिवारणं तु,
युद्धत्वरां मूर्छयितुं परं च।
दौत्यं महत्कारकमास, यस्या-
प्यन्यन्न मूलं मम चिन्तनेऽस्ति।।

१५. सुयोधनो मां प्रथमं समायात्
संग्रामसाहाय्यकृते सहर्षम्।
कापट्यतोऽहं परिगण्य तं च
द्वितीयकं; तस्य च मूलमेतत्।।

१६. निस्संगतां कर्तुमहं विधेयोऽ-
भविष्यमेवार्जुनसारथित्वात्।
परन्तु तद्भावविरुद्धतोऽहं
युद्धे निमग्नोऽभवमात्तमोदम्।।

१७. सत्यं तदेतत्सकलं च माता
गान्धारजा ज्ञातवती हि नूनम्।
अतो हि किं मां कुपितैवमूचे -
मह्यां न कश्चित् कुटिलोस्ति कृष्णात्।।
१८. विरुद्धसेनागतयोः समैक्यं
संस्थापयन् विग्रहवारणं स्यात्।
परस्परं हिंसनतो निवार्यं
घोरं निहत्यनिचयं किमर्थम्।।
१९. तस्मात्तयोग्रानलवृष्टिवन्मे
न्यपातयः शाप,ममुं गृहीत्वा
तन्मोचनारथं भवतीं न याच्ञा
कृता मया किं विनयान्वितेन?।।
२०. धर्मस्य रक्षाविधये समस्तं
कृतं मयेत्यादि हि नीतिवादान्।
उक्त्वैव मत्कर्मचयं च मां च
संरक्षितुं नोद्यतचित्त आसम्।।



२१. उक्तं मयैकं तु वचो - भवत्याः
शापोक्तिवन्मे सकलं च भाव्यम्।
नान्यन्ममेच्छा भवतीति वाक्यं
स्मर्तुं भवत्यर्हति मातृभावात्।।
२२. तथापि जाने बहुधा सदैव -
गान्धारकन्ये! कुरुपुत्रमातः!।
नित्यं प्रदीप्तस्त्वयि धर्मबोध-
सत्यप्रकाशो मयि नोदितोभूत्।।
२३. युद्धाय गच्छन् पुर एव मातुः
समीपमाशीर्वचनाय यातान्
पुत्रानवोचो न कदाचिदेव
सानुग्रहं 'त्वं विजयीभवे'ति।।
२४. संक्षिप्य गान्धारि! समूचिषे त्वं -
'यतो हि धर्मो विजयस्ततः स्यात्'।
भावप्रकाशं नितं तु सत्य,-
मेतत्समौन्नत्यमनेन नाप्तम्।।

२५. नित्यं स्वभर्तुः सहधर्मचारं
कृत्वा तदान्ध्यं स्वयमेव वृत्वा।
चकार या ज्योतिषमन्धकारं;
दग्धा वनाग्नौ पतिनैव सार्धम्।।
२६. भूमौ च न स्याद् वनिता यथासौ
या सत्यधर्मव्रतचारशीला।
मातृत्वदीप्तोज्ज्वलसत्यतेजः
स्थातुं पुरस्ते न च योग्यता मे।।
२७. बहोश्च कालादिह चान्ततश्च
नेत्रे समुन्मीलसि तीव्रतीव्रम्।
द्रष्टुं च घोरं नरकाग्नितुल्यं
शतं सुतानां मरणावशिष्टम्।।
२८. शापो भवत्या न निवारणीय-
स्त्वनुग्रहोऽयं सुमहानतोऽहम्।
नानुग्रहोऽन्योऽस्त्यत एव तस्मै
समर्पये मां सुहविःस्वरूपम्।।

★



## ७. अनुगीता

१. अस्तं यास्यति सन्तमोविसरणे
मेघोद्बणं तन्नभः,
सूर्यस्तत्क्षणतः पुरः समुदयं
दूरात् पुनः प्राप्स्यते ।
पौनःपुन्यतमिस्रकैः शुचिभिरा-
पूरिते चेतसीत्थं
सन्तोषोज्ज्वलभास्करस्य किरण-
स्पर्शस्य भाग्यं कदा?।।

*

२. पार्थाय प्रतिबोधितं समखिलं
गीतानभःपावनं
तीर्थं कीर्तितमत्र चास्ति सुतरां
विज्ञैरवन्यां सदा।
गीतासिक्तमहीतले तु कुहचित्
सन्तापशान्तिप्रदं

कादाचित्कतयापि किञ्चिदपि सं-
भूतं किमासीत् परम्?।।
३. दर्भाकीर्णं महाकाननमिव सं-
जातं त्विदं दुर्भरं
बीजोद्भेदमनु त्वरायुतमरु-
ज्जालं निहत्योग्रतः।
नास्त्येवास्य मृदुत्व;मस्ति बहुलं
तीक्ष्णत्वमत्युज्ज्वलं;
भूमौ तत्र समुग्रविग्रहमथ
स्यादेव भ्रात्रोरपि।।
४. चिद्रूपस्य लयं भवेदचिरतः,
प्रज्ञामयाक्ष्णोः पुरो
दृश्यन्ते शिवसूचकानि बहुल-
च्छायाकृतीन्यन्तरा।
तेष्वेकं विशदं भवत्ययि! कथं
पार्थोऽसि सन्ध्येयम-



त्रायातोऽसि किमर्थमागतिरियं?
- पप्रच्छ कृष्णस्तदा।।
५. पूर्णो मौनमहाब्धिरत्र हि बहि-
र्निर्गन्तुकामो भव-
त्यारादल्पनिमेषतोऽन्तरिदम-
त्यन्तं च दुःखोल्बणम्।
सत्यस्यास्य मुखामुखं कदनभा-
राद् विह्वलं तिष्ठते
पार्थाय प्रतिबोधितं भगवता
गीतासरित्सागरम्।।
६. "युद्धस्यानन्तरं सर्वं शान्तमासीद् यदा तदा।
दिग्जयानन्तरं भद्रा समेऽभूवन् यदा तदा।।
७. सारसत्तात्मसंगीताधारायै त्वं न केनचित्।
हृदः शंखं प्रसार्यात्र समागच्छः - स्मराम्यहम्।।
८. स्मृतिसूर्यप्रतापस्य प्रसरस्पर्शनं विना।
अबोधहिमशृंगे तु गीतां तुहिनसन्निभाम्।।

९. प्रत्यानेतुं कथं साध्यं मयेत्येवाब्रवं तदा।
त्वय्येव तावकौत्सुक्यशमनार्थं प्रयत्नितम्।।
१०. तदा सेनामुखे तस्मिन् विक्लबोऽभूस्तथा च यत्।
अथ मद्वचसां मार्गद्वारैवान्वचरश्च यत्।।
११. जानामि - सर्वं तद्गीताबोधेनासीन्न निर्णयः।
सर्वसात्करणे ते हृच्चाञ्चल्यं चैककारणम्।।
१२. चिदाकाशे यज्ज्वलति स्वत्त्वस्य पथतारकम्।
न तत् पश्यति यः सोऽयं नेयश्चान्यैरसंशयम्।।
१३. परिभ्रमस्य सम्मोहावर्ते संमग्नमागळम्।
स्मृतिभ्रंशे यथा तत् त्वां जहाति स्यात् कदाचन।।
१४. यथावातं चलन्नौकासमानमचरद् भवान्।
मच्चिन्तानुसृतं सालभञ्जावदचलद् भवान्।।
१५. विशीर्णकटनौकावदन्यत् किं साध्यते त्वया?।
जीवितस्य प्रयाणे तु नाविकोऽन्तर्हितो भवेत्।।
१६. नादृश्यत त्वया सोऽयं; नैवासौ श्रूयते स्म च।
समाश्रयस्त्वं मामेव नाविकत्वेन सर्वदा।।



१७. तदा त्वया च विभ्रान्तिहृदमग्नेन चक्षुषा।
दृष्टश्चातो ह्यहं साक्षाद् विराट्पुरुषतामगाम्।।
१८. ज्ञातं मया,हमेकस्त्वदाश्रयोऽन्यो न केवलम्।
अतो मत्प्राभवाच्चापि युद्धे वीरोऽभवद् भवान्।।
१९. अतो हि गीतातीर्थस्य पानात् तृप्त इति स्वयम्।
अज्ञात्वैव भवेन्मूढचिन्तामग्न इतोऽवधि।।
२०. अतो हि पार्थ! त्वं चेतः पात्रीकृत्य ममान्तिकम्।
समागमश्चिराद् गीतामन्विष्यन् स्वयमेव च।।
२१. यदा पार्थ! गतं सर्वं त्वयि प्रत्यानयेत् तदा।
शिष्टं किमन्तरा किञ्चित् सौहृदं मयि दृश्यते?।।
२२. अतोऽस्मि विस्मृतं सर्वमित्युक्त्या रक्षितः स्वयम्।
न त्वया वास्तवं किञ्चिज्ज्ञातमेव कदाचन।।
२३. तथाप्यर्जुन! संग्रामरंगे त्वं दधिषे मम।
अन्तरंगे संशयात्मकोञ्छानि विविधानि च।।
२४. जानामि - तेष्वदृष्टा या गीता नान्यत्र दृश्यते।
अर्जुनो यत् कृष्णमूचे सैव गीता तदा दृढम्।।

२५. 'न कांक्षे विजयं कृष्ण! न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द! किं भोगैर्जिवितेन वा?'।।
२६. ध्वन्यते पाञ्चजन्यश्च देवदत्तश्च तौ मयि।
पार्थ! तद् युद्धरंगोऽस्ति पुनरप्यस्य मे मनः।।
२७. रथे श्वेताश्वसंयुक्ते तिष्ठाव इति मे मतिः।
मनो मे संभ्रमत्येव यथाभूत् ते स्थितिस्तदा।।
२८. पश्यामि युद्धसन्नद्धान् सैनिकान् रथपार्श्वयोः।
हृद्भेदकः श्रूयते च संग्रामपटहध्वनिः।।
२९. इह तिष्ठति मत्स्येशः पाञ्चालो द्रुपदात्मजः।
धृष्टद्युम्नश्च सौभद्रो द्रौपदेयाश्च सात्यकी।।
३०. तत्र तौ भीष्मकर्णौ च विकर्णः कृप एव च।
सौमदत्तिर्धार्तराष्ट्रसुहृदश्च धनुर्धराः।।
३१. सर्वेऽपि वन्दनीयाश्च सोदराः प्रियमानसाः।
गुरवो मातुलाः साक्षात् पितरः पितृसन्निभाः।।
३२. पुरतश्च प्रतिदळमधिपाश्च महारथाः।
तिष्ठन्ति; पार्थ! पश्यामि पुरा ते दर्शिताश्च ये।।



३३. इमान् हन्तुं कथमहं ब्रवीमि भरतर्षभ!
लोकत्रितयलाभेऽपि निषिद्धमिदमर्जुन!।।
३४. महावृक्षे पातिते तु पतेच्च शुकनीडकम्।
उद्दिष्टं तन्नेति वादः पुरःक्षेपक्षमः कथम्?।।
३५. अवज्ञया त्ववज्ञाया मार्जनं साध्यते कथम्?।
रक्ताद् रक्तकळङ्कं कः शक्नोति परिमार्जितुम्?।।
३६. रक्तपङ्किलहस्तेनागच्छेज्जेता तथापि च।
तत्करग्रहणेनापजयः कः स्यादतः परम्?।।
३७. निहतः प्राण एकैको दुःखबीजं; न संशयः।
जानीयात् तन्न, यावत् स्यात् स्वास्थ्यं तावदियं कथा।।
३८. अयशस्करमेतद्धि युद्धमित्येव मन्मतम्।
विचिन्त्य मा भूदेतद्धि युद्धं, क्षीणाः स्थिता वयम्।।
३९. सर्वदा वरणीयः किं स्वकीयमनसो जयः?।
यद्भवेत्तज्जयस्तर्हि पुनः किं दिग्जयेन वा?।।
४०. मनसो विजये सर्वमधीनं तव केवलम्।
लोकः कथमधीनः स्याद् यो नेष्टे मनसः परम्।।

४१. मनो विजेतुं शक्नोति योऽसौ किं वा प्रतिष्ठते।
अनित्यस्यास्य लोकस्य विजयार्थं निरर्थकम्?।।
४२. सर्वेषामेव लोकानां परो लोको मनो भवेत्।
स्वास्थ्यं स्यात् तस्य मनसः; स एष निकषोपलः।।
४३. विश्वस्य सर्वस्य जये प्रत्यागन्तुं यदास्थितम्।
अस्माकं मन एव स्यात्; तदभावे भवो न हि।।
४४. इदानीं पार्थ! बोध्यं मे; वाक् ते गीतेति निश्चयः।
अलं तस्यामृतं मृत्योः पारं गन्तुं च साम्प्रतम्।।

★



## ८. धर्मदुःखम्

१. नैव कैश्चिदविजानता प्रथम-
नादमद्य घनमूकता-
व्योमगर्भमनुप्रविश्य ल-
यं गतं विपुलसागरम्।
घोरशब्दभयङ्करं बहुल-
मायया वलयीकृतं
ज्ञातवान् हरिरन्ततः कठिन-
मृत्युवक्त्रसमीपगः।।
२. धर्मजो मृदुलपादपातरव-
मन्तरा च शृणोति त-
द्धीरताविरहभारतः श्वसित-
मान्द्यतोऽप्यधिकनिर्ममः।
नम्रतान्वितमुखः स तिष्ठति
पुरश्च कृष्णनयनद्वयं

ह्यञ्जसोन्मिषति किं तयोर्हृदय-
बन्धदार्ढ्यविचिन्तया?।।

*

३. राज्येनालमतोऽपि चाधिकमह-
च्चारण्यवासो ध्रुवं
मा त्वं वारय मे गुरो! सदयमि-
त्यूचे स धर्मात्मजः।
पारं निस्वतया,धिराजपदवी-
चिह्नं श्रियैवोज्ज्वलं
पादे चार्पितवान् स्वयं रुधिरसं-
सिक्ते तदीये तदा।।
४. आसीन्निष्फलमेव भारतमहा-
युद्धं कठोरं च तत्
सत्ये भास्वति केवलां तमसि चा-
यातामहो! शून्यताम्।
कालानन्तहिमालयस्थतुहिनो-



ल्लासां च सन्तोषतः
स्वीकर्तुं प्रतिपालयन्निह तदा
तिष्ठत्यलं माधवः।।
५. भूयो मृत्युमुहूर्तके विगळिते
किञ्चित्तदा श्रीहरिः
शापोऽयं न च दानमेवमथवे-
त्यालोचनाविह्वलः।
सोत्कण्ठं प्रतिपाल्य तिष्ठति तदा
धर्मात्मजादागतं
वाचं तत्त्वार्थसत्यामृतमथ मु-
क्तासमं नित्यनूत्नम्।।
६. भास्वद्रत्नकिरीटमग्निसदृशं
सन्तापयत्येव मां
सूनं त्वत्र पथि प्रवृष्टमखिलं
पादे तु रूक्षं भृशम्।
जाज्वल्याग्निशिखायते स्फुरदिदं

पट्टाम्बरं मोहनं
कष्टं धर्मजकीर्तिरत्र हृदये
कालुष्यपूर्णं विषम्।।
७. पङ्के जातं न शोणारुणकुसुममिदं;
नान्धतामिस्रमेघे
जज्वालैकं च विद्युद्वलयितमपि त-
द्बाष्पजालं विहाय।
नासीदेवात्र चेतोहृदधिकमृदुलो
मन्दहासश्च भूमौ
जीवश्वासश्च गात्रस्फुटनवशगतो
नेह सुश्रव्यमेव।।
८. युद्धे को जितवान्, पराजयमतः
कः प्राप न ज्ञायते;
दुर्वाराद् विधितो गतो भुवमपि
त्यक्त्वा स दुर्योधनः
वीरस्वर्गमथापि हन्त! परिपा-



त्यद्यापि; धर्माध्वगा
भूमौ साधुजना भजन्ति नितरां
तां नारकीं यातनाम्।।
९. नैवामी त्विह पाण्डवा; नहि सम-
र्हन्ति राज्यावकाशं;
नाम्नैवेह च पाण्डवा; भवति वा
कः पाण्डुरेषां नृणाम्?।
पुत्राणामवकाश इत्यत इहे-
वास्त्येव नो कोऽप्यतो
राज्यं प्राप्स्यति नूनमेव कुरुवं-
श्यानां पुनः सन्ततिम्।।
१०. एतत्सत्यस्य विज्ञो भवति खलु भवान्
तत् किमेतं जनं म-
त्सोदर्यैर्वेदिकायामुपकरणतया
कारयस्येव तत्तत्?।
कर्णो मे सोदरोऽभूदिति परममहत्-

सत्यमेवं निगूढं
कृत्वासत्यं वदन् मां व्यतिचलितपथं
कर्तुमैच्छद् भवान् किम्?।।
११. कष्टं ज्ञात्वा न सत्यं त्वनृतवचनमे-
व श्वसन्नन्त्यकाले
ज्ञातं सत्यस्य तीक्ष्णस्वनमथ तद्-
बाष्पसन्तप्तरूक्षम्।
सूर्यस्याप्यस्ति काले जिगमिषति महत्
क्षीणतापत्वमेवं
घोरेणोग्रतमोग्रसाद् ग्रहणम-
प्ये,वं ममापि स्थितिः।।
१२. आपो जीवसुधामयास्तदपि चेद्
वायौ विषाक्ते तदा
सम्यक् त्वावरणीयमेवमपि ते
वाक् चापि मे मानसम्।
आवेशोज्ज्वलितं कृतं बहुविधं,



हा! तन्मुहूर्ते मया
चिन्तातीक्ष्णतया निवारणमतः
कर्तुं न चैवोद्यतः।।
१३. अस्माकं हृदयं च शत्रुनिवहान्
नः स्वीयदेहं ददौ
साक्षाद् भीष्मपितमहः स्वयमतो
युद्धे महाभारते।
युद्धान्ते समभूत् किमत्र? हृदयं
प्राप्तं तदीयं तनु-
र्यत्रासी;दुभयस्य तस्य तु वयं
लब्धावकाशास्तदा।।
१४. सैन्यं ते शत्रुपक्षे, स्वयमथ मत्पक्ष-
भाक् चाप्यभूत्तत्
न ज्ञातं तु मया च कुत्र हि भवेत्
पक्षे भवन्मानसम्।

नो लब्धं किमपीति चिन्तितमने-
नाहो! महाभीतिदं
राज्यं त्वेव हरे! त्वया किमथवा
दातुं च शक्नोषि मे।।
१५. लब्धं राज्यमिदं मयेति बहवो
ब्रूयु;स्तथा नैकदा-
प्यारक्ता च नदी प्रशान्तिदमनो-
दायीत्यहं ज्ञातवान्।
ज्योत्स्ना नेह स्फुटति; पुनर-
प्यत्र वर्षे घने भू-
मातुर्हृत्तटदग्धता न विरळा;
स्यान्मे किमर्थं मही?।।
१६. नो लीला शिशुजा; न चात्र कुसुमं;
नैवेह शीतानिलो;
नो भृंगः; शुकगीतकं न; शलभो-
ल्लासोऽपि नो दृश्यते।



नात्रैका स्मितमाधुरी; तिलकिता
सिन्दूररक्ता वधू-
र्दृश्या नो; पृथिवी च हन्त! भसिता-
रक्ता श्मशानोपमा।।
१७. राज्येनालं ममै,तद्रिपुरहितयशः-
शोभया च प्रियेण
त्वत्सख्येनापि; मेऽतःपरमिह भवनं
शान्तिदं काननं स्यात्।
एवं हा! वटपत्रतुल्यमथ सो-
त्कम्पं च धर्मात्मजः
पादे रत्नकिरीटमश्रुकणिका-
पातेन लक्ष्मीपतेः।।

★

## ९. राधिकादण्डकम्

१. मीलत्यक्षिदळं, दिवानयनयोः
साक्षात्पुरो वार्षिकै -
मेघैराव्रियते नभोऽद्य सरिता
चाब्धेर्मुखं प्रापिता?।
अस्ताब्धौ पतनोन्मुखी भवति सा
सन्ध्या, यदा तन्मनः
किं वान्विष्यति राधिकां? प्रियतमा-
मौत्सुक्यभावान्वितम्?।।

२. प्रत्येकं चित्रदृश्यं स्फुरितमपि वृतं
हन्त! खद्योततुल्यं
चायात्येव सुजीविते, ह्यपवृणो-
त्येवं त्वबोधे तले।
छायायां च यदा यदेच्छति भवान्
कामेव तां यत् पुरा



मध्येमार्गमलं विहाय गतवान्
स्नेहात्मिकां निर्दयम्।।

३. त्वं ह्येवाश्रयणं, त्वया विरहिता
चालंबहीना भवेत्
सेयं चेति दिवानिशं प्रतिनिमे-
षं हृद्यनुध्यायति।
राधा, यां द्रष्टुकामा भवसि, न त-
द्दर्शने शक्ति,ररात्
तिष्ठेच्चेद् भवतीह मे, तपसि म-
ज्जीवितान्त्ये मुहूर्ते।।

४. आसीस्त्वं न च दर्शने, पवनवद्
गच्छसि स्माद्य चान्त्ये
काले हन्त! महासमाधिलयने
चोद्युक्तचित्ते हरौ।
राधा किं स्मृतिजालके भवति? तां
सन्द्रष्टुकामश्च किं?

सेदानीमपि वायुवीचिसदृशं
गच्छेदितो वा ततः।।
५. कृष्णो न मेघवर्णाभ इति जानाति राधिका।
सुवर्णचन्द्रबिंबः स इत्येवासौ व्यचिन्तयत्।।
६. काळिन्द्यां बालचन्द्रस्य दर्शनेनाञ्जसा मुदा।
आत्मविस्मृतिमोहेनैवान्विष्यत्यत्र माधवम्।।
७. गोपिकास्वसृभिः साकं क्रीडन्त्यां किल राधिका।
कृष्णवेषं नैव ददौ कदाचिदपि कामिनी।।
८. निर्मुक्तकृष्णवेषैव निद्रिता निशि बोधिता।
अर्धनारीश्वरत्वस्य साक्षादन्वर्थता हृदा।।
९. कृष्णस्य दुःखं स्यादेवेत्येवं चिन्ताकुला हृदि।
विमुखैवोपविष्टा सा शीर्षन्यासेन वा विना।।
१०. कृष्ण आह्वयते वा स्यादिति चिन्तापरायणा।
निर्बन्धितवती नीचैः सन्ध्यायां कीर्तनस्वनम्।।
११. कृष्णः पुरो वा प्रत्यक्षः स्यादित्येवं निरूपणात्।
अनिमेषैव सान्विष्यत्यनुकं सा वरांगना।।



१२. मुरळीगानसान्निध्यं नितान्तं स्थातुमन्तरा।
नाललापात्मनो गीतं कदाचित् कृष्णकामिनी।।
१३. मा भून्मालेयसौरभ्यं चिन्तायामिति चिन्तया।
न जिघ्राय वराकी सा सुगन्धसुमसञ्चयम्।।
१४. प्रणयामृतमाधुर्यमन्तरैवास्ति तत् सदा।
सन्त्यक्तजलपानाभूत् प्रत्यहं स्थिरमानसा।।
१५. कृष्णं तं स्ववशीकर्तुं नैव भूषणभूषिता।
अन्तरा भूषिता किन्तु भूषणेन विनैव सा।।
१६. प्रेमात्मिका तु राधैव सपत्नीभ्यामिदं ततम्।
बहुशो विदितं सर्वलोकैर्निस्संशयं खलु।।
१७. यमुनायां च कृष्णेन सेतुरेका निधापिता।
एकेन तरुकाण्डेन योगमायाप्रवर्तनात्।।
१८. पारे स्थिता दुग्धहस्ता सत्यभामा च रुक्मिणी।
राधा च; प्रतिपारे तु कृष्णो दुग्धप्रतीक्षया।।
१९. वस्त्रलौल्ये श्रद्दधाने सेतौ निपतिते क्षणात् ।
सपत्नी द्वेऽपि; सा राधा तदेकाग्रमनाः सती।।

२०. परन्तु क्षीरपात्रं स कृष्ण एवेति चिन्तया।
नैव या पतिता; साभूत् कृष्णे लीनकळेबरा।।
२१. कृष्णार्पितं वपुः स्वीयमित्येवास्याः सदा मतिः।
कृष्णार्पितः स्वप्राणाश्चेत्येव चिन्तां दधौ सती।।
२२. लयश्रुत्योरिव तयोरेकीभावाप्तिरित्यसौ।
विचारयामास; तस्याः स्वप्ने याथार्थ्यभावना।।
२३. जन्मनैव तु कृष्णस्य सखित्वात् सा पतिव्रता।
त्यक्तमांगल्यकर्मैव जीविताय कृतव्रता।।
२४. यावत् कृष्णः स्नेहपूर्वस्तावदस्मिन् कळेबरे।
सौन्दर्यं प्रोज्ज्वलेदेवं राधाचिन्ता सदातन।।
२५. कृष्णांगुलीस्पर्शनात् स्वगात्रे कुसुममार्दवम्।
सर्वदा भवतीत्येव चिन्तयामास राधिका।।
२६. कृष्णस्य मधुराहारे राधाया मधुरं भवेत्।
कृष्णस्य रागश्रवणात् तन्मनः शीतळं भवेत्।।
२७. तयान्तरा जीवतुल्यं पालितो गोपबालकः।
तां परित्यज्य किं साध्नोतीति न ज्ञायते परम्।।



२८. अहं त्वया विस्मृतः किमिति पूर्वं त्वयोदितम्।
शृणोम्यद्य तदेव; त्वां विस्मरामि तथा कथम्?।।
२९. विस्मृतं चेत् पूर्वमेव विस्मरामि स्वयं तदा।
न विसस्मार मामेव, त्वामप्येवं; न शक्नुयाम्।।

★

## १०. राधामाधवम्

१. मेघस्ते मन एव, चाश्रु यमुना,
हृत्ते नभो व्यापकं,
नादाः कोपकषायितास्तव नवो-
त्कण्ठाभरं गद्गदम्।
तारं तावकस्वप्न,मत्र मृदुला
ते तनुर्बालचन्द्रः,
कालो जीवमिहास्ति, नीलशिखिन-
स्ते राधिकासङ्कटम्।।

२. धूमापूरितसान्द्रमेघसदृश-
स्त्वं घोरविस्फोटनो-
द्योगायोज्ज्वलजीवितं शमयितुं
कालो न शिष्टो बहुः।
तावद्दुर्गमवीथिकामतितर-
न्ती सा पुरस्तिष्ठती-



त्येवं तु प्रतिभाति कृष्णहृदये
दुःखाकुले; सोऽवदत्।।

३. तिष्ठाम्यद्य, सदै,वास्मिन् पृथिव्यग्रे, पतेदिदम्।
यदाकदाचित्, कालस्य प्रळयेऽन्तर्दधेच्च वा।।

४. तत्पूर्वं त्वां द्रष्टुमेव सन्तप्ताहं त्वरायिता।
क्षन्तुमर्हसि मामेवं वक्तुमुद्युक्तमानसा।।

५. अर्थशून्या वागिहास्ति तव पादे समर्पितुम्।
तावत्यर्थवती नान्या; तत् को जानाति वास्तवम्?।।

६. सारवद्दृश्यते सर्वं यत् तन्निस्सारवद् भवेत्।
निदधे वाचि किं कालो ह्यनर्थोऽर्थश्च सर्वथा।।

७. विकसन्मल्लिकायां तत्रैकान्तायां शरन्निशि।
यात्रावाचं विनैव त्वत्सकाशं त्यक्तवानहम्।।

८. सम्यगावृतसद्विद्युल्लतां निष्करुणं सतीम्।
स्वस्माद् विपाट्य निर्गच्छन्मेघववत् स्म समागतः।।

९. अन्तरा संभिनद्रक्तधमनीदुःखमानसः।
तथाप्यन्तर्हितोऽभूस्त्वं निशाप्रळयसीमनि?।।

१०. तुषाग्नितुल्यमाजन्म दहन्त्यनलनाळिका।
ग्रस्ता किमेकमात्रायामन्तर्दाहाद् यथा तथा।।
११. अथासीत् किं? क्व चाभूस्त्वं? न किञ्चिज्ज्ञायते परम्।
विवर्तनं विनैव त्वां परित्यज्य गतोऽस्म्यहम्।।
१२. अन्ततो जीवितस्यान्त्यमुहूर्ते स्मृतिमण्डले।
व्यक्तीभवति हा! दीनदीनं तद् वदनांबुजम्।।
१३. जानामि - ते प्रियं न स्यात्! द्वेषोऽपि व्याप्तिमाप्नुयात्।
यथा काले वर्धमाने - स्वाभाविकमिदं मतम्।।
१४. एकरात्रेण दुःखोग्रचितादग्धस्वजीविता।
अभू,स्त्वहं तदारभ्य चानुतापभराद् दहे।।
१५. अन्तर्हितासीः कुत्रेति विह्वलोऽऽज्ञातवान् सदा।
नास्ति मे तस्याधिकारोऽपीत्थं मथ्नाति भावनाम्।।
१६. कथं पश्याम्यहं? तिष्ठाम्येवं साक्षात् पुरोभुवि?।
तदहं द्रष्टुकामत्वं हृद्येव हतवान् स्वयम्।



१७. जानीयास्त्वं जनमिमं कृष्णं ते कामुकं; न हि।
पूर्वमित्रस्य तस्यैव हन्त! च्छायैव केवलम्।।
१८. ज्ञातं सर्वं सत्यमेव, न ज्ञातं किञ्चिदस्तु वा।
उक्तमप्यथ न ज्ञातुं शक्यं वा स्यात् कथञ्चन।।
१९. कदाचिदसमर्थाः स्युर्वाचः सत्यनिवेदने।
अथवा सति तस्मिन्नप्येवं को विश्वसित्यथ?।।
२०. तथापि राधे! सुश्राव्यमन्त्यं मे वाङ्मयं त्वया ।
तदर्थमेव स्यादेतद्विधिरन्त्यसमागमः।।
२१. न किञ्चित् साधितुं मेऽस्ति जीवितेनेहलौकिकम्।
नैव जीवितमप्येतन्मम सिद्धिरिदं शृणु।।
२२. स्नेहः केवलमेवेहाप्यृणत्वेनावशिष्यते।
कथं वा प्रति देयं स्या,दानृण्यं ह्येव जीवितम्।।
२३. तस्मात् क्षमस्वेति वक्तुमिच्छामि पुनरप्यहम्।
जानाम्यहं जीवितस्य पर्यायो नैव वागिह।।
२४. नोक्त्वेदं यदि गच्छेयमतो देशान्निरातपः -।
एवं चिन्तापि मा भूत्, त्वमतः संशृणु सर्वतः।।

२५. नष्टो न यदि मृत्यौ, तन्मृत्योः पूर्वं मनस्यथ।
प्रणयो यदि नष्टः स्यात् स नष्टः पूर्णरूपतः।।
२६. प्रणयास्तमयो जीवास्तमयश्च द्विवारतः।
मरणद्वयमेवेह विधिना कल्पितं भवेत्।।
२७. छाया सदा प्रकाशस्य विपरीतेति विद्यते।
न विद्यते प्रकाशस्य दयैवान्येति वास्तवम्।।
२८. ज्ञानस्य तलमित्थं स्याद् बहुधेतीति के विदुः?।
कश्चिन्न कोऽपि निर्वक्तुं शक्नोति सकलं त्विह।।
२९. जाने न मथुराराज्यनाथप्रणयिनी ह्यसि।
वस्तुतः प्रणयस्तेऽस्ति वृन्दावनकुमारके।।
३०. कदाचिद् योजितो हस्तो विस्रस्तो राज्यपालनात्।
सुखभोगसमन्वेषाच्चेति वा चिन्तितं त्वया।।
३१. चकार युद्धान् विविधान् कृष्ण एतत्तु वास्तवम्।
तथापि नैव स्वायत्तः कृतो भूमिलवो मया।।
३२. ऊर्ध्वमेवाग्निनाळस्य ज्वलनं विद्यते किल।
अब्रवीरेकदा, तत्तु श्रुतं नैवेति भावितम्।।



३३. न जानास्यूर्ध्वतोऽधश्चेत्येवं भेदं विना खलु।
प्रकाशदानाय चाग्निनाळं ज्वलति सर्वदा।।
३४. कृष्णोऽनिलसमस्त्वेवमेव चिन्तोदिता त्वयि?।
सदागतेस्तस्य गतेरज्ञातत्वाच्च कारणात्।।
३५. यद्येतद् वास्तवं त्वेकं ज्ञायते नैव केनचित् -।
पवनस्य गतिः सर्वत्रैव; सा मनसोऽपि च।।
३६. पवनस्य न रूपं च वर्णश्च, तत एव हि।
न कैश्चिद् दृश्यते वायुः, स्नेहस्तत्सदृशो ध्रुवम्।।
३७. स्नेहः कृष्णस्य चाप्येवं पवनस्येव वर्तते।
अदृश्यत्वादनस्तित्वं शोषश्च स्थापितं त्वया।।
३८. पवनस्य गतिस्तस्य निर्णेतुं नैव शक्नुयात्।
यथाविधि कृतं सर्वं; तत्र सत्यं न मीयते।।
३९. वायुतुल्यं न चाञ्चल्यं भूमौ कस्यापि विद्यते।
अतोऽभूवं दुर्बलात्मा; क्षम्यतां दयया त्वया।।
४०. गन्धः स्वकीयो नैवास्ति पवनस्य कदाचन।
गन्धभेदस्तु लोकेन सदा तस्मिन् निधीयते।।

४१. कथं तस्य वशं यातमिति प्रश्नो भवेत् सदा।
घृतः पूर्णस्तु होमाग्निशमनाय न कल्पते।।
४२. ज्वलतो होमकुण्डस्य तुल्यं मन्मानसं तदा।
ज्वलने शमने यत्र शक्तिः सन्दिग्धसंभ्रमा।।
४३. क्षुद्रं हृदयदौर्बल्यमेवासीदद्य चिन्तने।
अबद्धं तु तदेवेति सत्यं व्यक्तं भवत्यथ।।
४४. हृदन्तरे पश्य - तत्र कृष्णः किं दृश्यतेतराम्।
विध्यकल्पितकस्तस्य मार्गभ्रंशो भवत्यथ।।
४५. कळङ्को विद्यते नाग्निस्फुलिंगे तु कथञ्चन।
तदग्निशिल्पत्वेनायं रक्षितो राधयानुकः।।
४६. राधे! त्वदन्या का जानात्येतत्कृष्णस्य मानसम्?।
स्वप्नेऽपि वद्यता तस्मिन् नैव पश्यति राधिका।।
४७. तथापि पश्चात्तापेऽस्मिन् मया दग्धेन चिन्तितम्।
तत्रैव वद्यता दृष्टा राधयेति वृथा खलु।।
४८. आवयोः संगमो नासीद् जीवितेऽस्मिन् तथाप्ययम्।
कृष्णो जानाति मच्चित्तमेतत् सृष्टं जगत् त्वया।।



४९. तत्र सिक्ता वर्धिता च पुष्पवाटी यदास्थिता।
तस्यां गतो मामकवाङ्निदाघोऽग्निमरुत् किमु?।।
५०. कृष्णं पश्यन्ति दृष्ट्या स्म बहवः सत्यमेव तत्।
यत् ते जानन्ति सर्वं तद् बाह्यदृश्यानि वस्तुतः।।
५१. ददर्श मनसा कृष्णं सदा राधैव केवलम्।
राधे! यत् त्वं न जानासि तत् किं कृष्णहृदन्तरे?।।
५२. विशुद्धिपूर्णा यमुनानदीवद् राधिका सखी।
इति सत्यं मया नूनं विस्मृतं न कदाचन।।
५३. एतावान् प्रणयश्चास्ति राधिकायां मदात्मनि।
इत्यज्ञातं मयैवेति ज्ञानाद् दग्धो भवाम्यहम्।।
५४. ममापि पूर्वं मयि सा प्राणो भूत्वा स्थितिं कृता।
स्थातव्या मत्परं चापि मयि पूर्णा सदातन।।
५५. तारकं किं विमुच्येयमागतेत्यविचारयन्।
पुष्पः सर्वोऽपि तां रश्मिं हृदि संलाळ्य वर्तते।।
५६. कस्माच्छैलतटादत्र चागतेत्यविचरयन्।
स्वागतं कुरुते सर्वाः स्रवन्तीः सागरो महान्।।

५७. पुष्पस्य धर्मो भवति पुष्पवन्मानसस्य च।
सागरस्यैव धर्मः स्यात् सागरोपमचेतसः।।
५८. तथापि राधिकायां न मन्मनोऽस्थाद् विशेषतः?।
अदृष्टश्च कथं स्नेहो निष्कळङ्कः कथञ्चन?।।
५९. स्विन्नं वेपथुमन्तं च क्षीणं पार्थं रथे स्थितम्।
ददर्श चक्षुर्यत्तन्न ददर्शेमां च तादृशीम्?।।
६०. न कस्याप्युत्तरं किञ्चिदिति जानामि केवलम्।
चोद्ये तस्मिन् दहाम्येवमुत्तराय प्रतीक्षिते।।
६१. शतं चोद्यानि भूत्वा मां सहस्रशरवृष्टयः।
दीर्घीकुर्वन्ति; यत्रैतन्मनो मे विवशं भृशम्।।
६२. धर्मशास्त्राणि वा न्यायवादो वा युक्तिचिन्तनम्।
न हि साहाय्यदं चास्ति यदि राधा पुरःस्थिता।।
६३. ज्वलत्सूर्यात् शक्नुयाद्वा व्यति स्थातुं क्वचित्
क्वचित्।
कुत्र गच्छेद् विना द्रष्टुमिदमन्तर्ज्वलन्मुखम्?।।
६४. अतोऽर्थशून्यां वाचं मे मनसा पूरयन् पुनः।



ददामि तुभ्यं विद्धीदं सकलं चिन्त्यतां सदा।।
६५. सहस्रं गोपिकानां तु नृत्तगानदिनेष्वहम्।
स्वयं समर्पयन्तीं त्वां नापश्यं - तत्फलं त्विदम्।।
६६. वेणुगानसहस्रे मे नैकं मद्गीतमित्यहो!।
व्यतिरिक्ततया लोकैर्ज्ञायते कुह्रचित् परम्।।
६७. तथाप्यलभ्य एवेह रुक्मिणीसत्यभामयोः।
युग्मभावस्त्वयं लोके प्रशस्तो भविता ध्रुवम्।।
६८. कृष्णस्य राधिका का वा? को वास्याः
कृष्णनामकः?।
भवेद् राधाकृष्णयोगस्तथाप्यत्र निरन्तरम्।।
६९. कृष्णस्य गानं स्तुत्येत सर्वत्रापि च सर्वदा।
किन्तु कृष्णस्य गीतं किमेतच्चोद्यं निरुत्तरम्।।
७०. सर्वोऽपि सर्वदा कृष्णगीतं तु शृणुयादथ।
श्रुतं न राधयैवेदं, यस्यै गीतं मया सदा।।
७१. तथापि सर्वकालेऽपि गीतेनोद्धारयिष्यते।
राधाकृष्णा,वयं रागसंगोऽपि स्थास्यते चिरात्।।

७२. परन्तु मेऽपराधस्य सार्वकालिकशिक्षया।
प्रसरेन्मम रागोऽयमनाथत्वेन सर्वदा।।
७३. खण्डितैर्वंशकाण्डैश्च व्रणितैश्च हृदन्तरैः।
गीयेत शोकरागोऽसौ जीवो मे तत्र वर्तते।।
७४. गानान्त्येऽपि च गातुमत्र पुनर-
प्याकांक्षितागीतवत्
पूर्णं मीलितमप्यथो विकसना-
योत्कं यथा कोरकम्।
वाते सञ्चलनोन्मुखेऽपि नितरां
जाज्वल्यमानाग्निवत्
सम्यक्त्वेन भवं समास्वद यथा
सीतालता पादपम्।।

★



## ११. अरण्यकृष्णः

१. भूमिः कारगृहेण रूपमयते
हन्ताष्टदिक्संग्रहात्
सूर्योऽन्तर्निहोतोऽपि कोऽप्यधिगतः
केनचित् कारणेन।
एवं यद्यपि कर्मचक्रपतितं
स्यादेव चाजीवितं
दुःखं तत्र सहेद्दिवाकरमहा-
तारं च नो मुच्यते।।
२. भास्वद्रत्नमहाप्रकाशभरिता
कक्ष्यास्ति यत्र स्वयं
चान्तर्भूतमथैकवाग्गुदमहो!
सर्वत्र संडीनभाक्।
भित्तौ प्रस्तरिकामये च तळिमे
चापि भ्रमत्यञ्जसा।

तद्वत् तावकयत्नमेतदिह, त-
स्यावर्तनं जीवितम्।।
३. यद्यप्यस्ति गवाक्षकं बहुविधं
तर्ह्यप्यथ प्रोज्ज्वला
दीप्तिश्चेन्नयने तदस्ति तमस-
स्तुल्यं, न मार्गप्रदम्।
रक्षार्थं यदि जालकप्रतिभया
गच्छेत्तदा सर्वतो
भित्तिः स्याच्च शिलामयी तमसि वा
कारागृहं त्वेव तत्।।
४. सूर्यस्तारकमेवास्तीत्येतत्सत्य;ममून्यपि।
तारकाणि न सूर्यत्वप्राप्तये शक्नुयुः परम्।।
५. सदापि सौरयूथस्य सूर्यतारकमद्वयम्।
एतादृशं किं कालस्य कृष्ण एकोऽस्ति सर्वदा।।
६. यद्यपि स्वर्णरश्म्यास्ते दिवि तारसहस्रकम्।
यद्यपीमे तदेकत्र संघातत्वेन वर्तते।।



७. शोभास्ता नैव कल्पन्ते सूर्यदीप्तिप्रशामने।
तारकाणि न सूर्यत्वप्राप्तये शक्नुयुः परम्।।
८. सूर्यस्य समशीर्षोऽस्ति कृष्णो ह्युत्तप्तमानसः।
सूर्यः सूर्यश्चाभिमुखं तिष्ठेते विस्मयावहौ।।
९. हृदयं सूर्यबिंबेऽस्मिन्नर्पितात् कृष्णगात्रतः।
वर्तन्ते विगताः सन्तश्चत्वारः कृष्णमूर्तयः।।
१०. एकस्याः प्रज्वलद्दीपशिखाया विगता इव।
चतस्रस्ताः शिखा एव सकला विलसन्ति ते।।
११. कौमुदीकुड्मळं स्वापलोलुपं च शनैः शनैः।
चन्द्रिकायाः करस्पर्शात् विकासं भजते यथा।
१२. प्रणवः शंखसञ्जातः सर्वतः प्रसरन् यथा।
तीरोन्मुखं सञ्चरन्त्यो नदीनां वीचयो यथा।।
१३. दृश्यन्ते स्वस्वमार्गेण गच्छन्त्येते यथाक्रमम्।
तत्रापि मूलकन्दः स्वतपोनिर्मग्न एव च।।
१४. उत्तरा दक्षिणा पूर्वा पश्चिमा चेति ता दिशः।
चतसृश्श्च प्रयात्येतन्महाज्योतिश्तुष्टयम्।।

१५. हिमालयं प्राप्य चैकस्तदुत्तरदिगुन्मुखः।
आरण्यकः पांसुलांगश्चचारालक्ष्यमानसः।।
१६. राजपुत्रोऽपरः कृष्णः स पश्चिमदिगुन्मुखः।
रथमारुह्य यात्येव रथ्यया राजकीयया।।
१७. तृतीयकृष्णो यात्येकः स तु पूर्वदिगुन्मुखः।
अन्धन्तमो विभिन्दन् सद्रश्मितुल्यप्रकाशवान्।।
१८. दक्षिणापथमन्विष्य गच्छन् स श्यामकोमळः।
प्राप्तवान् राजधानीं तमिन्द्रप्रस्थं महोज्ज्वलम्।।

*

१९. निबिडं तन्महारण्यं गच्छन् गंभीरमच्युतः।
ददर्शाभिमुखं भ्रान्तचित्तं तं द्रोणनन्दनम्।।
२०. अन्वेषमाणे यं कञ्चिन्नयने परिपश्यतः।
स्फाटिके जलपात्रे सञ्चलन्मूर्खसमानकः।।
२१. हस्तयोर्दृश्यते तस्य क्रीडाचापो मनोहरः।
वनवेत्रकृतो वल्लीनिर्मितं सूत्रमेव च।।
२२. अनन्तस्यान्तरिक्षस्य मानायेव निरन्तरम्।
बाणान् वर्षत्ययं दूरादाविष्टहृदयः परम्।।



२३. न कुत्रापि च लक्ष्यन्ते शरा,स्तत्पतनात्ततः।
हस्तताडैः क्रमेणोच्चैर्हसत्यत्र पुनःपुनः।।
२४. शराळिर्लक्ष्यवेधिन्यो न, नो लक्ष्यं च किञ्चन।
एवं शिक्षयितुं चेव स कृष्णं दृष्टवानथ।।
२५. मरुल्लोलजटाजूटः कृष्णतालो भयङ्करः।
तस्याधश्चित्तचाञ्चल्यविह्वलः सन् स तिष्ठति।।
२६. प्रशान्ताब्धिसमानोऽयं कृष्णस्तिष्ठत्यथान्तिके।
स्पृष्ट्वान्योन्यं दृष्टिभिस्तावाभिमुख्येन तिष्ठतः।।
२७. पुनस्तद्दर्शनाशक्तेः कृष्णस्य नयने किमु।
क्षीणेऽधःपतिते चाग्निस्पर्शात् तन्वीव वल्लरी।।
२८. कुतश्चिदन्धतामिस्रे ह्यागमद्वाग्गुदं यथा।
विकीर्णयत्यथो दूरस्मृतिश्चिन्ताशतानि किम्?।।
२९. सहस्रशिखरास्तीर्णे मनसि स्वापलोलुपाः।
मेचका विहगाः क्रन्दमानाः प्रविचरन्त्यथ।।
३०. विभ्रान्तिरेतत् सर्वं वा सत्यं वेति व्यवस्थितुम्।
किमर्थमत्रागतो वेत्यपि ज्ञातुमशक्नुवन्।।

३१. माधवो निश्चलोऽभूत् स संसस्मारार्जुनादिभिः।
बन्धनस्थं द्रोणपुत्रं समानीतं दिनं तथा।।
३२. निर्मुक्तशीर्षरत्नोऽसौ वनं नीतो गुरोः सुतः।
भ्रान्तः कृष्णः स्वयं वेति बभूवास्वस्थमानसः।।
३३. गुरुं निरायुधीकर्तुमसत्यस्यायुधं तदा।
धरतः स्वस्थचित्तत्वं कथं कृष्णस्य लभ्यते?।।
३४. त्रैलोक्यसुखभोगानां लाभेऽपि दृढसत्यता।
न त्याज्यैवेति यस्याभूत् सोऽसत्यवचनः कृतः।।
३५. पुत्रशोकान्न्यस्तशस्त्रं दुःखितं च महागुरुम्।
हन्तुं कृताज्ञस्य शान्तमनोलब्धिः कथं भवेत्?।।
३६. पुत्रस्य धर्मः को वास्ति तातसंरक्षणं विना?।
योऽशक्तस्तस्य पुत्रस्य न कदाचिद् भवेद् ध्रुवम्।।
३७. सहस्रं ये धर्मसेतून् नाशयन्ति स्म तान् प्रति।
वंशहत्या द्रौणिकृता कथं धर्मस्य लंघनम्?।।
३८. तस्य हा! गुरुपुत्रस्य हननाय शिरोमणिम्।
हर्तुमाज्ञा मनोभ्रान्तिं विना कृष्णान्न गच्छति।।



३९. एवं चिन्तासहस्रेण विह्वलं यदुनायकम्।
मत्वा भ्रान्त इति द्रोणनन्दनः प्रत्यगाद् द्रुतम्।।
४०. अपश्यं कं? स्वीयमेव प्रतिबिंबं किमित्ययम्?
चिन्ता समानरूपैव व्यक्ताभूदुभयोरपि।।

★

## १२. ज्ञानकृष्णः

१. सर्वत्रोदेति घोरं स्वनमतिभयदं
ज्ञातमेतद्, रणं तद्
द्रष्टुं नेत्रं प्रदातुं वचनमुपगतं,
तन्मनोनेत्रयुग्मे।
मा भूद् दृश्यं तदेतत् त्विति कदनमति-
र्ध्यायति ह्यन्धनेत्रे
युद्धं चाभून्महाभारतमखिलमिदं
सञ्जयेन स्फुटोक्तम्।।

२. ज्ञातं सत्यं तदा दुर्विधिविहितमहो!
सर्वजन्तुं च घोरे
चान्धत्वे निपतिष्यति, द्रुतं ग्रसति ता-
मिस्त्रं मनोज्ञप्रभाम्।
धर्माधर्मान् विवेक्तुं भुवि च यथा सुदु-
स्साधकृत्यं तथा स्यात्



दुर्वारं तं करिष्यत्यथ विधिमखिलो-
न्माथकः काल एषः।।

३. राज्ञश्चात्मसुखं विधिश्च परमं,
हन्त प्रतापोज्ज्वला-
काशे किं सुख,मत्र खड्गमनुग-
च्छत्येकमत्युत्कटम्।
को जानीत भयं सुसंवृतमिदं
धैर्येण? यावन्नरो
राजा चेत्यभिषिच्य चेद् भवति
सुक्षेमं तदैवं स्थितिः।।

४. संग्रामे मरणं भजेत, विजयी
स्याद्वा यथा वार्धके
प्राप्ते काननवास एव गतिरि-
त्येषैव मार्गद्वयी।
चिन्तायां कतरद् द्वयोरधिकमु-
त्कृष्टं भवे,न्नेति, त-

च्चिन्ताभावत एव नास्ति विभिदे-
त्यत्रातिचिन्ता किमु?।।
५. राजत्वाय, तदीयनीतीरहिता-
यै च प्रशास्त्यै, भवेत्
प्रायश्चित्तिरियं स्वयंवृतमृति-
र्वन्याश्रमं वा वरम्।
कालस्यन्दनवाहने सति सम-
त्वं स्याच्च निम्नोन्नत-
स्थानानां तु कदाचिदेव न हि त-
ज्जानाति कश्चिन्नरः।।
६. पौरस्त्यदिङ्मुखेऽल्पाल्पे कुङ्कुमाभे च को भवेत्।
वनपर्वतसानूनि ह्यतिक्रम्य चरन् द्रुतम्?।।
७. मृग्यो यद्यपि तस्मिंश्च कृष्णं पश्यन्त्यथो जवात्।
पथो व्यतिचलन्त्यस्य यच्छन्ति सरणिं यथा।।
८. अमुं पश्यन्नपि द्रष्टुमशक्तेरिव गोव्रजः।
दूराद् गच्छति भीतः सन्निव मन्दगतिं श्रयन्।।



९. नवनीहारांबुबिन्दुस्नातास्तत्र कदंबकाः।
दृष्ट्वा तं किं निमीलन्ति दळपक्ष्माणि सत्वरम्?।।
१०. न कुत्रापि दधच्चक्षुर्मनसा स्पर्शनं विना।
कृष्णः स पुनरप्येवं चरति त्वरयान्वितम्।।
११. प्रक्षिप्तशरसङ्काशं श्ळथचक्ररथोपमम्।
भग्नमूलतरोस्तुल्यं लक्ष्यं दृष्ट्वा प्रयाति सा।।
१२. धर्मपुत्रं द्रष्टुकामो राजधानीं महोज्ज्वलाम्।
प्रविशत्यत्र सोऽदृश्यपवनेन समो द्रुतम्।।
१३. तस्मै मार्गं दातुमिव स्थितास्ते द्वारपालकाः।
तस्मै पथप्रदर्शायोड्डयन्ते वैजयन्तिकाः।।
१४. राजधान्यां तत्र किञ्चिद् यत् पश्यति तदा ह्यसौ।
ददर्श धृतराष्ट्रं तममेयं त्वन्धभूपतिम्।।
१५. कुरुवंशाधिपो वृद्धो निर्ममो निस्वमानसः।
पुत्रं यथा स्वीकरोत्येवामुं वात्सल्यपूर्वकम्।।
१६. 'पुत्र एवाह'मित्येव मेने कृष्णश्च किं तदा?।
शाश्वतो निष्कळोऽज्ञेयो निर्मलानन्दमानसः।।

१७. चिन्ताशून्ये वृथानेत्रे यदा पश्यत्यतो द्रुतम्।
कृष्णान्तस्तप्यते सर्वं कृतं कर्म निरन्तरम्।।
१८. पथ्यन्तं पुरतः पश्यन् स्थितोऽत्र पथिको यथा।
स्तब्धचित्तो विह्वलेन मानसेन पुरस्सरः।।
१९. सागरं प्राप्य लयनप्रायेव तटिनी स्थितः।
किंकर्तव्यविमूढेन मनसानिश्चितेन च।।
२०. तदा कृष्णस्य नयने पततीव कमण्डलुः।
कृष्णवस्त्रं च पात्राणि भस्मपूर्णानि तानि च।।
२१. वृद्धेषु दृश्यते वृद्धो धृतराष्ट्रो महारथः।
वेषो जर्जरितोऽत्यन्तं जराविष्टं शरीरकम्।।
२२. तनुनिश्वासवेगार्द्रबिसिनीतन्तुना परम्।
बन्धोऽत्र देहे शिथिलं भवेदेष सदाप्यहो!।।
२३. कृष्णस्य विस्मयाधीनान्मनसः कश्चिदुक्तवान् -।
“यस्य पुत्रा मृतास्तस्य पितुर्भावोऽयमेव च।
२४. योऽसौ वीरातिवीराणां तनयानां शतस्य हा!।
पितासीत्; किन्तु नैकोऽपि शिष्टोऽभूत्तत्सहायकः।।



२५. सर्वराज्याधिपश्चैकच्छत्राधिपतिरप्यसौ।
अवशिष्टो न कोऽप्यासीत् पितुरस्यान्त्यकर्मणे।।
२६. पुत्रदुःखाग्नितप्तत्वादारभ्यान्धमहीपतिः।
जलपानं विनाहारं भुक्तवानिति वास्तवम्।।
२७. हंसशय्यातलं राजधान्यां सज्जं सदा त्वसौ।
शेते स्म भूमावेवेति न कैश्चिज्ज्ञायते परम्।।
२८. ‘मास्तु युद्धमिदं’ - पुत्रान् युद्धसज्जान् निरोधने।
बुद्धिशक्त्या प्रज्ञया च समुद्योगं चकार सः।।
२९. प्रतिकाराग्निरेतस्य जज्वाल हृदये यतः।
तन्मूलं कृष्णकर्माण्येवेति सर्वो विजानते।।
३०. चित्तेन शतपुत्राणां मृतिज्ञानयुतेन कः।
शक्नुयात् करुणापूर्णः स्थातुं भूमौ कदाचन? ।।
३१. अत एवान्तिकस्थं तं भीममायसरूपिणम्।
बभञ्जाश्ळेषभावेन पितृतुल्योऽपि शक्तिमान्।।
३२. राजानं निश्चलं कृष्णः कुलपर्वतसन्निभम्।
हस्तकुड्मळयुक्तः सन् स्थितो दण्डप्रतीक्षया।।

३३. अन्तरागतवाग्भिः किं वेपते कठिनोज्ज्वलैः?।
बहिःप्राप्यं शापवाचं प्रतिपालितवान् किमु?।।
३४. करेण वेपमानेन मूर्ध्नि स्पृष्ट्वा दयामयः।
अनुग्रहं ददन्नूचे - 'पुत्र! त्वं विजयीभव!'
३५. हस्तेन विततान् श्मश्रून् लाळयन्नूचिवान् पुनः।
'जयः पराजयश्चात्र समानः सर्वदा भुवि।।
३६. गच्छामि, राज्यं हित्वेदं गन्तुं मे काल आगतः।
युद्धखड्गं परित्यज्य कमण्डलुकरोऽस्म्यहम्।।
३७. किं मे सुवर्णवस्त्रेण? परुषैर्वल्कलैरलम्।
अथ यात्रास्तु; दूरादाह्वयते वनभूमिका।।
३८. नासिं धुनोति नेत्रे वा करो वागपि तत्र वा।
यत्र वायोश्च कौमुद्या विशदा शुद्धता खलु।।
३९. शान्तिस्तत्र, नखाग्रोग्रा चिन्ता नास्ति कदाचन।
वञ्चको मनुजो नास्ति, सर्वत्र स्वच्छता भवेत्।।
४०. यत्र नास्ति शिलातल्पश्चामरो वा नृपोचितः।
अन्तःशीतनवोन्मेषसमार्द्रा वनभूमिका।।



४१. गच्छामि, राज्यं हित्वेदं कृष्ण! मे यच्छ सम्मतिम्।
पारुष्यं कुत्रचिन्नास्ति कालुष्यं च, भवत्यपि।।'"
४२. धृतराष्ट्रोऽस्य यात्रोक्त्यावतर,त्यस्य वामतः।
हस्तावलंबं दत्वान्धीभूता सा धर्मपत्न्यपि।।
४३. तयोः प्राप्नोति सख्येन कुन्ती मातापि, दूरतः।
समाह्वयति किं तांश्च कश्चिद् वनविहंगमः?।।

*

४४. जित्वा च सिंहासनमेत्य राज्य-
भारेण यो जीवति किं सुखेन?।
मृत्वानलं प्राप्य विहाय लोकं
गच्छन् दिवो वा किमु सर्वथापि?।।
४५. एषा तु सर्वे प्रियसूनवोऽपि
समानभूताः खलु वार्धकेऽस्मिन्।
अतः परं किं परमार्थतत्त्वं
व्यक्तीकरोत्यत्र च धर्मयुद्धः?।।

४६. अन्ते विजानाति न कोऽपि युद्धे
जयत्यथो वा मरणं वृणोति।
जयन्ति ये तन्न हि ते स्मरन्ति,
मृता न शक्ताः स्मरणेऽप्यमुष्य।।
४७. पुरं गतोऽतश्चरतां पुरस्तात्
त्वरायुतानां महतां त्रयाणाम्।
विनीतियुक्तस्त्वनुयाति कृष्णः
क्षणं च सोत्कण्ठितमानसेन।।
४८. यदा यदा याति वनान्तिकं स
पदे पदे तद्धृतराष्ट्रभूपतेः।
प्रभामयं नेत्रमभूत्क्रमेणे-
त्यसौ विजानात्यथ नन्दनन्दनः।।
४९. इतस्ततस्तद्वनमाप्नुवन्तं
ज्वलत्प्रकाशस्फुरणेन वा स्यात्।
कृष्णः प्रकाशप्रसरो विदूर-
स्थितः स मेने धृतराष्ट्रनेत्रे।।



५०. कदापि नो जीवितकर्मरंग-
कृतं च पापं निजनेत्रयुग्मे।
चकार, तस्माद् विधिना दयार्द्रे-
नेदं कृतं स्यादिति कृष्णचिन्ता।।
५१. तमोमये काननसीम्नि चान्धं-
तमःपचं पावकमेव मन्दम्।
गतेषु तेषु प्रतिगन्तुकाम-
श्चचार कृष्णस्तु विचारमग्नः।।
५२. पादावनुस्यूतगतिः परन्तु
नेत्रे तमस्तद्विशतीव चोच्चैः।
शनैर्न तस्थौ न चचाल कृष्ण;-
स्तमस्यगाधे प्रवहन्नभूत् सः।।
५३. तमोवृताक्षिद्वितयेन दृष्टे-
ष्वनेकसत्येषु न किञ्चिदेकम्।
प्रकाशपूर्णस्य च चक्षुषोऽस्य
द्रष्टुं शशाकेत्यवबोधते स्म।।

५४. सर्वं त्वघं लौकिकनेत्रयुग्मे
निरन्तरं पश्यति यत्तदा तु।
तिरोहितः स्यात्तत इत्यसौ स
तीक्ष्णः परं चिन्तयतीव कालः।।
५५. ज्योतिर्यतो वा तदनु प्रयाति
च्छाया हि नूनं, तदयं प्रकाशः।
तिरोहितश्चेत् तमसि प्रयाति
स्वाभाविकीयं प्रकृतिः सदैव।।
५६. न लंघयेत् कालनियोगलेशः
कृष्णः कदाचित् स विधिप्रविज्ञः।
कालेन चेदं विदितं भवेत्; सः
प्रवाहरूपेण गतोऽन्धकारे।।

★



## १३. छायाकृष्णः

१. श्यामानन्दपथेन कुत्रचिदथो
दूरे ज्वलत्प्राभव-
श्रीयुक्तं सुमनोहरं पुरमथ
च्छायामुकुन्दोऽगमत्।
तस्मै स्वागतवीथिकाविशदता-
लाभाय संप्रार्थयन्
सन्ध्याः श्रीमतयः सदा समुषसः
काले प्रदोषेऽपि च।।
२. शापस्योग्रतमोव्रजेऽनुगमिते
सत्यप्यबुद्धः परं
तत्तापस्य ज्वलच्छिखाविसरणं
विस्मृत्य च श्रीहरिः।
यातुं प्रस्थितवान् स्वयं प्रियतमा-
वासस्थलं द्वारकां;

दृष्ट्वा तां दिवसा गता बहव इ-
त्यालोच्य तप्तोऽन्तरा।।
३. ग्रीष्मे शीतजलं च; दुःखमयहृ-
च्छान्तिप्रदस्नेहसं-
स्पर्शः; कृष्णविचारमग्नहृदया
शीतरश्मिश्च यासौ।
सोत्कण्ठा प्रियमेव भक्तिभरिते
चित्ते चिरं स्थापय-
न्यास्ते सा; न हि सोऽपि तत्र सुचिरा-
दन्वैच्छदेनामहो!।।
४. सान्वैच्छद् दिवसं प्रति स्वपनके
हृद्यमायूरपिञ्छं;
तस्यै किन्तु ददौ सुवर्णकिरणं
श्रीवत्ससंस्पर्शकम्।
सान्वैच्छद् दिवसेन हन्त! मुरळिं
संगीतसान्द्रां तनुं;



प्रादां किन्तु गभीरसान्द्रनिनदं
श्रीपाञ्चजन्यं गुरुम्।।
५. निद्राशून्यमनाः प्रियं च सुचिरं
प्रोज्ज्वलत्स्वर्णनाळी-
तुल्या मां प्रतिपाल्य चास्थित गृहे
त्वेकाकिनीं रुक्मिणीम्।
स्मर्तुं वा समयं न किञ्चिदिह तां
नान्वैच्छमत्रापि हा!।।
६. दीर्घकालात् कुण्डिनस्य प्रियाभूता समागता।
प्रथमं द्वारकाराज्ञी तदन्वर्धांगिनि च सा।।
७. द्रष्टुं तामथ दृष्ट्वा प्रत्यागन्तुं - केवलं त्वियम्।
यात्रे,दानीं च यात्रेयं स्मृतिद्वारेति कथ्यताम्।।
८. जानामि सर्वं, रुक्मिण्यै दत्तं सौख्यं पदोन्नतिम्।
न कदाचिन्मनस्तस्या द्रष्टुं शक्तोऽभवं पुनः।।
९. तददृष्ट्वा प्रतिदिनं नव्यकर्मपरोऽचरम्।
नानामार्गैर्जन्मदौत्यमेवं मत्वा त्वरान्वितः।।

१०. पत्नीं तामग्निसाक्षित्वेनोढां लाळनया विना।
नर्मवाचं विनौदासीन्येनैवापश्यमन्वहम्।।
११. इत्थं चिन्ताशतेनाभूदस्वस्थं कृष्णमानसम्।
आसीदग्निस्फुलिंगं स गतकालो निरन्तरम्।।
१२. माल्येन संवृतामाद्यरात्रावपि चिरादपि।
न प्राप पत्नीमुत्कण्ठाविह्वलां तां प्रियोऽप्यहम्।।
१३. म्ळातं स्युः स्वप्नसूनानि तन्निश्येव हताशया।
तथापि मन्दस्मेरार्द्रैवासीत् प्रियतमा वरा।।
१४. तज्जीवितं नित्यमभूत् कृष्णस्य प्रतिपालनम्।
एवं तस्यै नैकदापि प्रतिपालितवानहम्।।
१५. तथापि नित्यमेवासौ न किञ्चिन्नीरसं विना।
सस्मार कृष्णसामीप्यलाभाय प्रतिपालनात्।।
१६. शनैः शनैः प्रज्वलन्ति न शाम्यन्नाळिका सती।
नित्यं स्वकीयकक्ष्यायां निषण्णेयं तुषाग्निवत्।।
१७. घटदीपसमानां तां जीवन्तीं स्वसहोदरीम्।
पुनर्नेतुं विग्रहार्थं सोदरेऽत्र समागते।।



१८. कृष्णस्य तस्य चान्योन्यं घोरे युद्धे समागते।
न शक्ता रुक्मिणीं तं स्वमनसा चानुवर्तितुम्।।
१९. मनःस्पर्शी स्थितः स्वस्य यो भ्राता तत्पराजयम्।
प्रार्थयामास कृष्णस्य विजयार्थमियं स्वसा।।
२०. प्रथमं सा रथारूढा द्वारकापुरमागता।
सर्वत्र कौतुकार्द्रैः सन्दृष्टा सन्तुष्टमानसा।।
२१. तासां मध्ये तिष्ठति स्म चन्द्रिकातनया यथा।
केनचिद्रचितेवार्द्रवैद्युतीशिल्पमातृका।।
२२. इदानीमपि दृश्यं तत् स्मृतिरंगे च नृत्यति।
अज्ञात्वैवागतः कोऽपि वात इत्यपि दृश्यते।।
२३. तेन किं मार्जितं फाले तिलकं कुङ्कुमाङ्कितम्?।
तस्या भाग्यं च सुकृतं तेनैव सहितं गतम्।।
२४. शैशवेऽभ्यस्तसर्वास्त्रविद्या या पितृसद्मनि।
राष्ट्रतन्त्रज्ञताकीर्तिं लेभे कन्या च रुक्मिणी।।
२५. द्वारकानगरीं कृष्णपत्नीत्वेनागता यदा।
तदारभ्य तु तच्चक्रवाळं तत्पुरभित्तयः।।

२६. द्रवीभूतं नवीनार्द्रहरिचन्दनसन्निभम्।
सुगन्धवाहिनी कृष्णनिकटे सास्थिता सदा।।
२७. अत्यन्तमादकं कुन्दकुसुमं नैव सा स्मृतौ।
विशुद्धिनिष्यन्दि कृष्णतुळसीदळसौरभम्।।
२८. न जाने सा का ममेति चाद्यावधि, तथा प्रियाम्।
अन्विष्य तामिदानीं त्वत्रागमस्य च कारणम्।।
२९. जाने न किञ्चिदुत्कण्ठा प्रियां द्रष्टुं तथापि मे।
प्रतिगन्तुं मनोऽशक्तं तस्यामेव वितिष्ठति।।
३०. प्रासादे चलमञ्चके तनुतरां
वल्लीं यथा सन्ततं
गाढाश्ळेषशयां समश्रुभरितां
साध्वीमणिं रुक्मिणीम्।
कृष्णोऽपश्यदिहैकदैव; महिता
साऽऽरात् तरंगावलिं
दृष्ट्वा हन्त! वृथाचरत् पवनव-
च्चाञ्चल्यचेतोयुता।।



३१. कृष्ण! त्वां च वृणोम्यहं पुनरिहै-
व स्याज्जनिर्मे, तदा
ज्ञातुं मामिह कल्पसे किमिति त-
च्चेतस्तथान्विष्यति।
तस्यैवोचितमुत्तरं न हि ममे-
त्यालोच्य कृष्णः परं
ह्यन्तर्दग्धतया मनोविवशतां
प्राप्नोति विज्ञोऽप्यपि।।
३२. दृष्टा सा पुरतो यया मधुरित-
स्वप्ने सदा निर्निमे-
षाक्षी चुंबनतत्परा प्रियतरा
राधा रहस्यागता।
दृष्टा सा नयनद्वयस्य नितरां
भामा सुकर्पूरकं
दृष्टं नोत्तरमन्तरा - न हि पुरो
दृष्टा प्रिया सोत्थिता!।।

३३. किं मौनं प्रियरुक्मिणीमनसि स-
म्पूर्णं स्वकीये मन-
स्याप्तं तप्ततया सुपूर्णमिति म-
त्वायं मुकुन्दोऽञ्जसा।
प्रासादाद् बहिरागतो वनतटं
गन्तुं स्वयं छायया,
स्वीयं जन्म न दातुमत्र वशमि-
त्येतत्त्वृतज्ञो महान्।।

★



## १४. अनन्तकृष्णः

१. रात्रेरस्ति नभोऽवकाश इति त-
च्चित्तं च; सूर्योदये
त्वस्तं गच्छति चावकाशमखिलं;
चैवं दिनस्यापि तत्।
गर्विष्ठो दिवसः प्रयाति गगन-
स्यैवावकाशीति त-
द्भावस्यापि गतिः समानमतुला
निस्तेजता चैतयोः।।

२. कानि कानि मनांस्यस्य स्वायत्तीकर्तुमाशया।
कृष्णस्यास्य तु स्वायत्तीकर्तुं नास्ति मनः क्वचित्।।

३. सर्वं च सागरस्यान्तः संलयत्यत्र नित्यशः।
सागरो न कदाप्यन्यमन्विच्छति लयेच्छया।।

४. कृष्णमन्विष्य चायान्ति बहवो बहुकालतः।
नान्यदीयोऽहमित्येवं किमु कृष्णस्य विश्चयः?।।

५. तथापि सा याज्ञसेनी सखी जानन्ति मां यथा।

तथा काचिन्न जानीयादित्येवास्य मतिः सदा।।
६. उत्तरापथमन्विष्य गतो यो माधवस्तदा।
जगामान्तःपुरस्यान्तः क्षणं छायेव सोत्सुकः।।
७. अन्तर्हितौ दूरकालौ पश्चादेकाक्यसौ हरिः।
पाञ्चालीमुपतस्थे सच्छायाच्छायेव मौनवान्।।
८. न श्रुतं पादपातं तद् द्रुपदात्मजया तया।
ज्ञातं तया न कृष्णस्य सान्निध्यं किञ्चिदप्यथ।।
९. स्वकल्पनाकृतं केळीमन्दिरं द्वारकापुरम्।
कदंबपुष्पमञ्जूषेवास्मिन् श्रीकृष्णविग्रहम्।।
१०. कृष्णाय नैव कथिता वाचस्तत्पुरतो भुवि।
द्रवीकृताश्च पेतुस्ता मन्दं मन्दं हृदागताः।।
११. "इयन्तमेव कालं त्वत्सखीत्वेनैव जीवितम्।
मया कृतं; सखीत्येतत्पदार्थं नैव जानती।।
१२. न कदाचित् त्वया ज्ञातं श्रीकृष्ण! मम मानसम्।
अथवा तद्विधत्वत्वेन त्वया नाट्यं कृतं सदा।।
१३. जीवितं मे तथा मामकीनत्वेनानयन् त्वया।



स्वेच्छामार्गेण कुर्वाणः कुतो वेत्यभिधीयताम्।।
१४. पार्थसारथिरासीस्त्वं तदाभूस्तस्य मानसम्।
मज्जीवितं नयंस्त्वं न पश्यसि स्म मनो मम।।
१५. स्वयंवरश्च तातेन निश्चितश्च यदा तदा।
कमनीयांग! मनसा वृतस्त्वं संशयं विना।।
१६. जानाम्यहं तु सर्वज्ञं मनस्ते यन्ममान्तरम्।
भावं च ज्ञातवान् स्यास्त्वमिति मे दृढनिश्चयः।।
१७. राजधान्यं तद्दिने मत्सुमंगल्यमुहूर्तकम्।
कृष्णमेवाक्षमा स्थापयित्वा चित्तेऽहमास्थिता।।
१८. तातस्य जिष्णुरेवातिप्रियङ्कर इति श्रुतम्।
मयाश्वस्तं फल्गुनस्य वनवासत्वविश्रुतौ।।
१९. यत्र वेद्यां धनुर्वेधो भवितव्यो यथाविधि।
तत्र स्थितेषु नो दृश्यः पार्थो वा पाण्डवोऽपरः।।
२०. राधेयोऽस्ति च तं दृष्ट्वा 'न वृणे सूतपुत्रकम्'।
एवं मयोक्तमुच्चैरेवास्यां सदसि वास्तवम्।।
२१. कर्णे शरे धृते तर्हि लक्ष्यं विध्यत्यसंशयम्।

तस्य भार्या भवेयं तत् त्वमन्यः स्याश्च केवलम्।।

२२. अतो ह्यहं समाक्षिप्तवती सूतकुमारकम्।
तादृग्रूपेणान्तरा तदनुद्दिष्टं च यद्यपि।।

२३. तस्मिन् पपात कर्णे स तूग्रबाण इव क्षणात्।
स स्म संडयते युद्धभूमौ शतसहस्रशः।।

२४. नवयौवनसम्पन्ना वीरराजकुमारकाः।
सहस्रनयनैर्गाढमाश्ळिष्येमां स्थितास्तदा।।

२५. नापश्यं सूक्ष्मतः कञ्चित्तेष्वथाप्यब्दनीलिमा।
कस्यचित् पतितो दृष्टिविषये मामके तदा।।

२६. स त्वमित्येव मत्वा तु मनसा माल्यमर्पितम्।
मया तस्मिन् कृष्णवर्णे वराक्या त्वरयान्वितम्।।

२७. सर्वान् मदिष्टदेवांस्तानाहूयात्मार्थतान्वितम्।
प्रार्थयं; कृष्णवर्णस्यैवास्त्वत्र विजयोन्नतिः।।

२८. मत्प्रार्थनायाः साफल्यं बभूव; क्षणमात्रया।
शरो विध्यति मत्स्येऽस्मिंश्चटुलं चलिते शितः।।

२९. तत एव मया ज्ञातं तत्सत्यं भीतिदायकम्।



नासीज्जयस्ते, विजयो जेताभूदिति वस्तुता।।

३०. तदा श्यामळवर्णो मन्मनसि स्थितिमाप्तवान्।
न मद्गोपाल इत्यग्नौ प्रतप्तोऽभवमन्तरा।।

३१. मम सत्यं विजानासि त्व,मित्थं वञ्चना कुतः?।
ममान्तस्तीर्थधारायां प्रवाहोऽस्तंगतस्तदा।।

३२. समानीता विप्रवेषाः कुतस्ते पञ्चपाण्डवाः?।
लीला सा त्वत्कृतात्यन्तं निष्ठुरासीन्निरूपणे।।

३३. तदा प्रच्छन्नवेषत्वे यदि जिष्णुरथागतः।
तथाप्यपश्यं प्रच्छन्नवेषं त्वामच्युत! प्रभो!।।

३४. अनन्तरं स्वीकृतं तत्सर्वं विधिकृतं मया।
अत एव च पञ्चानां वधूत्वं मयि पातितम्।।

३५. मा कुर्वेवंविधं क्रूरकत्यं कृष्ण! भयङ्करम्।
तनुः पञ्च विभज्यामि मनः कथमहं तथा?।।

३६. प्रवहन्त्यन्धकारे च मन्दं पञ्चप्रणाळिकाः।
विना स्पर्धामनैश्चल्यादपतन्त्यो महाह्लदे।।

३७. ददर्श तिमिरे लोको नित्यं पञ्च प्रदीपिकाः।

विभान्ति ताः पञ्चतालेष्विदानीमप्यनारतम्।।
३८. तद्दर्शकेषु कः पश्येन्मधुसूदन! तां नदीम्।
या नयन्ती प्रवहति मार्गभ्रंशं विना त्वमून्?।।
३९. निश्चलो दीपनाळानां व्राता यद्यप्यथापि ते।
चलन्ति प्रतिबिंबानि सततं वीचिकाचये।।
४०. न कश्चित् पश्यति नदीं तमिस्रे दृश्यते प्रभा।
नद्यां चलति किञ्चित्तद्दीपानां मज्जनं भवेत्।।
४१. एवंविधं नयाम्येव पञ्चकं तत् तदन्तरे।
पुनरागतवान् त्वं हा! प्रतिचालयितुं गतिम्।।
४२. पञ्चस्वपि ह्यर्जुनस्य प्रियं मयि विशेषतः।
जानासि तत् तथापि त्वमागच्छत् तन्त्रसंयुतः।।
४३. अन्यथा मत्प्रियं पार्थं वव्रे तव सहोदरी।
सुभद्रा त्वत्सहायेन किमर्थमिति चिन्त्यताम्।।
४४. त्रैलोक्येऽपि कदाचिन्न श्रुतमेवं - स्वसोदरीम्।
अपहर्तुं निशीथिन्यां सहायः सोदरो महान्।।



४५. पूर्वमेव सपत्नीत्वव्यथा ज्ञाता मया, पुनः।
सोदर्यप्यागता ते मे सपत्नीत्वेन हा! हरे!।।
४६. ततः परं न निदधौ मनो मयि ममार्जुनः।
न स्नेहोऽस्यावशिष्टः स्यादिति ज्ञातं मया तदा।।
४७. न्यासीकर्तुं, क्रियाशून्यो वस्त्राक्षेपं च वीक्षितुम्।
यदि स्नेहोऽन्तरा तर्हि कथं पार्थस्य शक्यते?।।
४८. वनवासेऽनुभूतासु यातनासु च कास्वपि।
व्यथाया भागभाक्त्वेन सुभद्रा स्म न दृश्यते।।
४९. यदा तमिस्रे भ्रमति तदा नानातपः सखा।
सति प्रकाशप्रसरे सहैवायाति सर्वदा।।
५०. वनवासे सदाप्येव पाण्डवानां समाश्रयः।
शमनौषधि,रेषाऽऽसं पाञ्चाल्येव न चापरा।।
५१. सुखैश्वर्यप्रतापाश्च सम्पदो भाविनो ध्रुवम्।
इति ज्ञाते समागच्छत् सुभद्रापि सुभद्रका।।
५२. जानामि, तप्तहृदया सती चाहं यदा यदा।
आहूयाम्यथ रक्षार्थमागच्छस्त्वं तदा तदा।।

५३. तथाप्यर्पितसर्वस्वा पूर्वमेव ततः किमु।
रक्षणीयेति कर्तव्यं विस्मृतं स्यात् कदाचन।।
५४. यद्यपि त्वं पूर्वमेव विदन् सर्वं यथातथम्।
मद्गुरन्तेषु किञ्चिन्न वारितं तत्क्षणं त्वया।।
५५. द्यूते यदा पाण्डवा मां न्यासीकर्तुं समुद्यताः।
तदा वारयितुं तान् त्वं प्रयत्नं नाकरोः किमु?।।
५६. सभायां वसनाक्षेपे यावन्मदवमाननम्।
तावत् त्वया क्षमापूर्वं कृतं किं प्रतिपालनम्?।।
५७. रक्षार्थं न मदन्योऽस्तीत्येवं ज्ञापयितुं किमु?।
भर्तृष्वेकोऽपि रक्षार्थं नेति ज्ञापयितुं किमु?।।
५८. तस्मात् तस्मान्मात्रमेव ह्रदे पातयति स्म माम्।
अवमाने? क्षमा तत्ते रक्षकत्वप्रतीक्षया? ।।
५९. न जानामि, ज्ञायते न किञ्चित्तव मनो हरे!।
जानाम्यहं - सखित्वार्थं ईदृशोऽपि क्वचिद् भवेत्।।
६०. हृदयं मे मथित्वैवंकृतः कृष्णो न चिन्तितः।
एवंविधं भवेत्, किन्तु सोऽभूदन्यश्च केवलम्।।"



६१. संसारामयसागरोर्मिषु दृढं
मग्ने हृदि ध्वान्तवत्
कृष्णः पूर्णतयाभवत् किमिति त-
च्चिन्ताभरेणात्मनः।
विस्मृत्या किमु कृष्णखण्डनमिदं
क्रूरं मयेति व्यथो-
न्मत्ता तत्र समुत्थिता झटिति हा!
कृष्णा चलन्मानसा।।
६२. कृष्णस्तत्र समस्तवस्तु मनसा
श्रुत्वाथ निष्पक्ष्मळं
तावत् तां परिलाळयन् मृदुकरे-
णैवं विचार्याकुला।
पाञ्चाली परितो निरीक्ष्य सुचिरं,
तद्बाष्पनिर्मार्जन-
व्यग्राः शीतळमन्दमारुतकराः
पर्युत्सुका दर्शिताः।।

६३. पाञ्चालीव न चापरा स्वमनसं
जानाति, सर्वं तया
ज्ञातं चेत् सत्यमेव द्रुतमिह सा-
याति शैत्यर्तुतुल्या।
तच्चित्तं मम मानसस्थकदनं
स्वर्णाग्नितुल्यं शमं
कुर्वीतेति विचिन्त्य चैव हरिर-
त्रान्तर्हितोऽभूत्तदा।।

*

६४. आदियादवमहःप्रभूत-
महतां चतुष्कमतिदुःखितं
चागतं समयेऽन्तिमे बत!
ददर्श दृश्यमतिदुर्धरम्।
तत्प्रदीपचतुष्टयं महित-
सूर्यमण्डलदिदृक्षया
दृष्टवत्तु तपनं तदा च चर-
माद्रिगह्वरतमोगतम्।।



६५. ज्ञायते न वनवह्निदग्धमिह
नीडमित्यधिकत्वरा-
चागता विहगावलीव बहु-
दुःखितो व्रजकुलाधिपः।
सर्वतोगमनमेव मे विधि-
रिति स्वयंसुविदितं तथा-
प्यत्र नास्ति गगनान्तरेषु त-
मिस्रबाधिषु यथा तथा।।

★

## १५. श्याममाधवम्

१. काळमेघघनगर्जितोग्र-
रजनौ गभीरशरवर्षणे
चाश्मसारगृहकक्ष्यके
तव तु भूप्रवेशमिह दुःखदम्।
अर्धरात्रिसमये कठोरतर-
वैद्युते पथि जलाकुले
जीवयानमतिजीवनानि तव तु
चिन्तिते परमसङ्कटम्।।

२. नित्यकाळिमवितानकृष्णजल-
वाहवीचिनिवहं भिया
शैशवे परिवर्जयन् कृत-
पथा च यानमतिदुष्करम्।
रक्तबिन्दुततियुक्तशोणन-
यनैरनारतमथो महा-

क्रूरभूतनिवहानुधावितवि-

दूरयानमतिभीतिदम्।।

३. त्वं ततः परमहो! कठोरतर-

मार्गतोऽप्यतिभयङ्करं

नित्यभीतिदपलायनान्यधिक-

साहसानि सुदृढं परम्।

जीवितं त्विह तदेव ते; मृति-

भयं च निष्ठुरतानले;

सर्वमेव सहनानि, कोऽपि न च

वेत्ति ते दुरितजीवितम्।।

४. शैशवे विधिवशात् स्वमातृपितृ-

दर्शनं विनिवारितं;

दुःखरात्रिषु पदानि ते व्यचर-

न्नतीव भयानकम्।

के च के च निशाचरादिबहु-

मारकाः कटुवधोद्यमाः



कोमळं शिशुशरीरकं प्रति

केवलं च वृथा कृताः।।

५. के च के च वृथापवादनिशिताः शरा

निपतितास्त्वयी-

त्यत्र ते मधुरं मनोज्ञमृदु-

मन्दहास इह तदुत्तरम्।

बाह्य एव तदिदमन्तरा कठिन-

वेदनानलशिखाभवत्,

तद् विदन्ति न च केऽपि ते मनसि

तप्तघोरघनमूकताम्।।

६. प्राप ते बहुलनव्यकर्म-

निचयो यथा महितसागरे

वीचिजाल,मथ पर्णतुल्यमिह

सर्वतः स्म दिशि गच्छति।

सर्वकर्मसु निमज्जसि स्म तु

परार्थमेषु च सुबद्धता

कुत्र वास्ति विपरीतता समभवत्
कुतस्त्विति न वेद्म्यहम्।।

७. साध्वसाध्विति तयोः सुयोजनमि-
हास्ति किं हि युगचेतना?
पुण्यपापसुविवेचने किमिह
जीवितं भवति वस्तुतः?।
कः स धर्म इह को न्वधर्म
इति विवेचनं परमदुर्घटं
धर्मनिर्णयनमेव दुर्लळित-
मित्यसौ मतिमतां मतिः।।

८. व्यक्तिरेव खलु चायुधं, नियति-
रस्ति वीरभटनायकः
एतदेव वचनं तु वस्तुकथनं
सुनीतिसहितं च तत्।
व्यक्तिरेव नियतेश्च सारथिरि-
हान्यथा समयचक्रकं



निश्चलं तुहिनपिण्डवन्महित-
सत्यमेवमपरं विदुः।।

९. सत्यमत्र बहुधा भवन्ति खलु;
येषु चैकमवलंब्यते
कैश्चिदन्य,दपरैः, परन्तु बहु नास्त्य-
सत्यमिह केवलम्।
तद् यथा विजयलब्धिरस्य भव-
तीति चेदपि ततः परं
सत्यमन्यदथ वर्ततां प्रथम-
सत्यखण्डनपुरस्सरम्।।

*

१०. बहु श्रुतं गोकुलजीवचित्रं
मनोविनोदोल्लसितं ददाति।
अहं न शक्नोमि परन्तु सर्वं
ग्रहीतुमद्यापि हृदा तदापि।।

११. व्रजे तु गोपालकबालकैश्च
क्रीडन् तदा यत्र चरत्ययं स्म।

कदंबवत्फुल्लमदः स्थलं च
प्रमोददायीति जगत्प्रशस्तम्।।
१२. यदा शनैर्मृत्युरथैति ते प्राक्
सदा तदा, हा! हसितैर्यथेष्टम्।
क्रीडैश्च गानैर्लसितुं च रन्तुं
कथं स्म शक्नोषि सुखालसः सन्?।।
१३. यतस्तमिस्रे पततीव पत्रं
तदाऽऽविदः कंसकृतं खलत्वम्।
दृष्टस्त्वया क्रीडनके च याने
कठोरपैशाचनिशाचरत्वम्।।
१४. समुद्यते रेणुकणे च दृष्ट-
स्त्वया तदुग्रं विनृशंसरूपम्।
समुन्मिषत्सूनवनान्तरे च
बभूव सिंहो रुधिराभिलाषी।।
१५. क्रीडा कथं बालकवृन्दकेळी-
जलेऽप्यहो! काळियसन्निधौ स्यात्?।



हासः कुतो वा मृदुकोमळेऽस्मिन्
सूनाग्रपत्रे रुधिरप्रवाहः?।।
१६. दृष्टः सदान्धे तमसि प्रदीप्त-
तारागणे रूक्षतरं च चक्षुः।
पश्चाच्च सा दृष्टिरुदग्रदीप-
शिखाततीनां तपनात्कठोरा।।
१७. प्रसन्नवात्सल्ययुतेव शीघ्र-
मादाय चोत्संगतटे निधाय।
स्तन्यं ददौ तच्च विषोग्रतप्तं
तत्तावदासीत्स कराळकालः।।

*

१८. पुरबन्धनवासिनीसमूहो
बहुसाहस्त्रिकगोपिकाततिः सः
सहसैव विमुच्यते स्म, नैकेऽ-
प्यपवादाः पतिताः, पतिस्त्वमासीः।।
१९. अवलंबविहीनकन्यकानां
परमालंब अभूर्दयासमुद्रः।

अत एव पतिस्त्वमेवमेवे-
त्यपि लोकोऽगणयच्च नीचबुध्या।।
२०. नवनीतहरः शिशुर्युवत्वे
न हि मुक्तो भविता च तत्स्वभावात्।।
अत एव स्यमन्तकस्य हर्ता
न च कोऽप्यन्य इतीव लोकचिन्ता।।
२१. चरसि स्म मुदा प्रदोषकाले
सह कन्याभिरये! व्रजे सगीतम्।।
अपवादशरव्यमप्यतस्त्वं;
न हि तैस्ते गणितः स बाल्यकालः।।
२२. न कदाचिदुपेत्य मातरं वा
पितरं वा त्वमसान्त्वयश्च वाग्भिः।
अथ तौ समुपेक्ष्य गोकुले त्वं
नगरं प्राप दयाविहीन एव।।
२३. इति ते बहवो विरुद्धवाचां
विषसर्पाश्च भवन्त्यनेकरूपाः।



तव वेत्ति न कोऽपि तीव्रदुःखं
प्रियचिन्ताव्यथितं च मानसं ते।।
२४. कुरुराजपुरस्त्वया तदानीं
समवाप्तं किमु कारणं विनैव।
तव दौत्यकथामहापराधो
बहुनिन्दाकथनाय कल्पते स्म।।
२५. निजशोणितसन्ततेर्मुखं ते
हृदयाश्वासकरं प्रभातकाले।
तव दर्शनसौख्यमेव भोक्तुं
न च लब्धः समयः; कियान् तवाधिः?।।
२६. प्रियरुक्मसहोदरीसुतस्ते
न हि दृष्टोऽपि च जातमात्र एव।
विदितं तव शंबरेण वारा-
न्निधिवीच्यै प्रहितो हठादितीदम्।।
२७. अतिसङ्कटमेव चिन्तने ते
हृदये हन्त! तरंगितं पितृत्वम्।

अतितीव्रतरं ज्वलद्व्यथाग्निं
सहसे स्माऽऽधिकदीर्घकालिकं हा!।।
२८. अभिमन्युरथः स चक्रव्यूहा-
न्तरितोऽभून्निजदृष्टिदोषहेतोः।
इति दुःखं तव सोदरीसुतोऽयं
त्वत एवाधिकतीव्रतां भजेत।।
२९. ज्वलदग्निसमं मनस्तवेदं
परितप्तं कलुषं तदा बभूव।
'तव सूनुरभूच्च कर्ण' एवं
कथितं हा! भवता न मातृकुन्तीम्।।
३०. समरोग्रदिवाकरे यदा समस्तं
गतवत्येव तमस्युपेत्य मात्रा।
कटुशापतमिस्रकोग्रकाको-
ळकवर्षं त्वयि पातितं त्वयाप्तम्।।
३१. सहनैस्तव तीव्रयातनानि-
र्भरयात्रामनुसार्य जीवितं स्वम्।



पुनरेव तमिस्रतान्धगर्भ-
स्थलिकां प्रापितवान् किमत्र चैवम्।।
३२. न हि कश्चिदिमानि वेत्त्य,हं हा!
सुतरां हर्षकुमार इति प्रशंस्ये।
तदिह श्रुतमात्र एव चान्ध-
न्तमसः किं ह्रदमज्जनाय कांक्षा।।

*

३३. आराद्दिव्यपथा हि कोऽपि तरसा
चायाति यात्रापथं
कर्तुं मांगळिकं नवीनकुसुमै,-
र्दग्धकर्पूरतां स्याः।
निश्शेषं ज्वलिते त्वयि ध्रुवमिह
प्राप्स्यते धूमगन्धं
घ्रातुं ते रवितेजसं महितम-
प्येवं वरीतुं स्वयम्।।

*

३४. कालो यदा सूक्ष्मतमो बभूव
लीनं त्वमत्रोर्जकणस्वरूपि।
सूरो यदेंगालमभूत्सुशीतं
भूतं ज्वलद्गन्धकरूपधारि।।

३५. लोको यदा मृत्कणतां दधार
लीनं त्वया जीवलवस्वरूपि।
नभो यदा नीरदखण्डरूपं
व्यक्तं त्वयाऽऽत्राऽऽग्निकणस्वरूपि।।

३६. अब्धिर्यदैकं मरुभूमिरूपं
प्राप्यैकबिन्दुत्वमवाप सूक्ष्मम्।
तदा त्वया जीवसुधात्वमाप्तं
मुदा स्वयं सत्परिपूर्णरूपम्।।

*

३७. श्यामाकाशपथात्समागतमिह
स्यन्दनं श्वेतमेकं
मेघाकीर्णनभःपथा चरति यद्
भूमिं विहायाञ्जसा।



पत्रं नास्ति, सुमं च नैव, न हि त-
न्मूलं च, नीलांबरं
नैवेहास्ति, विहायसि प्रकटितं
किं नीलिमा वर्धते?।।

★